CC-0. In Public Domain. Digitization by eGangotri

Nanaji Deshmukh Library, BJP, Jammu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथाचारादर्शः प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ ॥

॥ श्रीमङ्गलम् ॥

श्रीः अथ मंगलम् ॥ ॥ श्रीहयग्रीवायनमः ॥ शुक्लांबरधरंविष्णुंशशिवर्णंचतुर्भुजम् ॥ प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये ॥ १ ॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमम् ॥ देवींसरस्वतींचैवततोजयमुदीरयेत् ॥ २ ॥ व्यासंवसिष्ठनप्तारंशक्तेःपौत्रमकल्मषम् ॥ पराशरात्मजंवंदेशुकतातंतपोनिधिम् ॥ ३ ॥ व्यासायविष्णुरूपायव्यासरूपायविष्णवे ॥ नमोवैब्रह्मविधयेवासिष्ठायनमोनमः ॥ ४ ॥ अचतुर्वदनोब्रह्माद्विबाहुरपरोहरिः ॥ अफाललोचनःशंभुर्भगवान्बादरायणिः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनकराज १९६०।

॥ ॐ श्रीगणेशायनमः ॥ ॥ दीक्षितोरणयज्ञेषुविबुधानंददायिषु ॥ हरिरब्धिसुतावक्र
सोमपीतीपुनातुवः ॥ १ ॥ अहोरात्राश्रितोधर्म्मइहवाजसनेयिनाम् ॥ निबद्ध्यतेनिबद्धो
यो धर्म्मशास्त्रनिबन्धिभिः ॥ २ ॥ तत्रमनुः ॥ ॥ ब्राह्मेमुहूर्त्तेबुद्ध्येतधर्म्मार्थौचानुचिन्तयेत्
॥ कायक्लेशांश्चतन्मूलान्वेदतत्वार्थमेवच ॥ ब्राह्मोमुहूर्त्तःसन्ध्यापूर्वदण्डद्वयात्मकः ॥ तन्मू
लान्धर्म्मार्थहेतुक्रियानिमित्तकान् वेदतत्वार्थमिति तत्वपदमपन्यायप्रतीतार्थनिवारणा
र्थं वेदतत्वार्थोब्रह्मेत्येके ॥ ब्रह्मपुराणे ॥ ब्राह्मेमुहूर्त्तेसुस्थेचमानसेमतिमान्नृप ॥ विशुद्धश्चि
न्तयेद्धर्म्ममर्थञ्चास्याविरोधिनं॥अपीडयातयोःकाममुभयोरपिचिन्तयेत् ॥अथ मूत्रपुरी
षोत्सर्गविधिः ॥ ॥ तत्रविष्णुपुराणे ॥ ततःकल्येसमुत्थायकुर्यान्मैत्रंनरेश्वरः ॥ नैर्ऋत्या
मिषुविक्षेपमतीत्याभ्यधिकम्भुवः ॥ मैत्रंपुरीषोत्सर्गः मित्रदेवताकंपायुसंबंधात् ॥ नैर्ऋ
त्यांशयनस्थानात् ॥ आपस्तम्बः ॥ मूत्रपुरीषेकुर्याद्दक्षिणांदिशंदक्षिणापरांवा॥गत्वेतिशे
षःदक्षिणापरानैर्ऋती ॥तथा ॥ अस्तमितेचबहिर्ग्रामादाराच्चावसथान्मूत्रपुरीषयोः कर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्जयेत् ॥ आराद्दूरे आवसथाद्गृहात् ॥ वायुपुराणे ॥ शुष्कैस्तृणैस्तथाकाष्ठैः पत्रैर्वेणुदले
नवा ॥ मृन्मयैर्भाजनैर्वापिअंतर्द्धायवसुंधराम् ॥ तृणैःकुशादिव्यतिरिक्तैः ॥ काष्ठैः पाला
शादिव्यतिरिक्तैः तृणमयाग्निकंकाष्ठमित्यापस्तंबवचनात् ॥मनुः॥ मूत्रोच्चारसमुत्सर्गंदि
वाकुर्यादुदङ्मुखः ॥ दक्षिणाभिमुखोरात्रौसंध्ययोश्चयथादिवा ॥ एवञ्चमनुनासर्वकाल
व्यापिमुखनियमविधानात् ॥ प्रत्यङ्मुखस्तुपूर्वाण्हेसायाह्नेप्राङ्मुखस्तथा ॥ उदङ्मुख
स्तुमध्याह्नेनिशायांदक्षिणामुखः ॥ इतियमवचनम् ॥ सदैवोदङ्मुखःप्रातःसायाह्नेदक्षि
णामुखः ॥ इतिदेवलवचनंचनादर्त्तव्यं ॥ मन्वर्थविपरीताया स्मृतिःसानप्रशस्यते इतिबृ
हस्पतिवचनात् ॥अथवा मानवंदिवापदंप्रातर्मध्याह्नपरमितिनविरोधः ॥पुनर्म्मनुः॥ छा
यायामन्धकारेवारात्रावहनिवाद्विजः ॥ यथासुखमुखःकुर्यात्प्राणबाधाभयेषुच ॥ रात्राव
हनिवेत्युक्तेः सन्ध्यायामुदङ्मुखत्वनियमएव॥अत्रसांख्यायनगृह्यम् ॥यद्येकवस्त्रोयज्ञो
पवीतंकर्णेदत्वा द्विवस्त्रतापक्षेतु नियम्यते यतोवाचंसंवीतंसंवीतंनिवीतंअंसयोर्द्वयोर्मध्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्यआच्छादितशिरः नांसोऽवगुण्ठितइति मनुवचनान्निवीतमेवकर्त्तव्यं तच्चपृष्ठलंबि
तं निवीतमापृष्ठदेशावलंबनं ग्राम्यधर्म्मेष्वितिनिगमपरिशिष्टेदर्शनात् ग्राम्यधर्मोमैथु
नम् कडाराइतिवद्बहुवचनमाद्यर्थे तेनमूत्रपुरीषोत्सर्गपरिग्रहः ॥ तत्रहारीतः ॥ घ्राणा
स्यंवाससावेष्टयित्वा मृद्वात्रींकण्ठेसमासज्यदक्षिणबाहुपार्श्वेकमण्डलुमादाय ॥ मृद्वात्रीं
मृत्तिकापात्रीं ॥ यमः ॥ शिरःप्रच्छाद्यकुर्वीतशकृन्मूत्रविसर्जनम् ॥ मनुः ॥ नमूत्रंपथिकुर्वी
तनभस्मनिनगोव्रजे ॥ नफालकृष्टेनजलेनचित्यांनचपर्वते ॥ नजीर्णदेवायतनेनवल्मीके
कदाचन ॥ नससत्वेषुगर्तेषु॥ मूत्रमितिपुरीषस्याप्युपलक्षणम्॥ चितिरग्निचयस्थानंचिता
वा॥ नजीर्णदेवायतनइतिदृष्टार्थं काष्ठेष्टकादिपातसंभवात् ॥ यमस्मृतौचसर्वदेवायतनइ
तिनिषेधोवक्ष्यते ससत्वेषुप्राणिमत्सु तथा ॥ ननदीतीरमासाद्यनचपर्वतमस्तके ॥ पर्वत
निषेधादेवपर्वतमस्तकनिषेधेसिद्धे पुनस्तन्निषेधोयत्रापिपर्वतोऽशक्यपरिहारस्तत्रापि
मस्तकवर्जनार्थः ॥ देवलः ॥ वापीकूपनदीगोष्ठचित्यंभःपथिभस्मसु ॥ अग्नौकाम्येश्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शानेचविण्मूत्रंनसमाचरेत् ॥ वाप्यादिपदंजलरहितभागनिषेधार्थमम्भसःपृथगुपादा
नात्॥काम्येप्रकृष्टस्थाने ॥ अत्रचविष्णुः ॥ नोपरेनशाद्वलेनपराशुचौनोद्यानोदकसमी
पयोर्नाकाशे ॥ आकाशेऽसंवृतदेशे ॥ तदुक्तंवायुपुराणे ॥ यदाकाशःस्मृतोभीमस्तस्मा
न्नासंवृतेक्वचित् ॥ कुर्यान्मूत्रंपुरीषंवानभुंजीतापिबेन्नवेति ॥ एवञ्चाकाशेअट्टालिकादि
स्थितइतिव्याख्यानमशुद्धं ॥ अत्रयमः ॥ पल्वलानितडागानिनदीप्रस्रवणानिच ॥ नग
गोमयभस्मानिफालकृष्टानिवर्जयेत् ॥ तुषाङ्गारकपालानिदेवतायतनानिच ॥ राजमा
र्गश्मशानानिक्षेत्राणिचखलानिच ॥ उपरुद्धोनसेवेतछायांदृश्यञ्चतुष्पथं ॥उदकंचोदका
तञ्चपन्थानञ्चविवर्जयेत्॥वर्जयेद्वृक्षमूलानिचैत्यश्वभ्रबिलानिच॥उपरुद्धोवेगी पंथानमि
त्यनेनैवनिषेधेसिद्धेराजमार्गचतुष्पथयोरुपादानंदण्डधारणरूपदृष्टप्रयोजनकं॥हलायु
धनिबंधेतुसमीपलक्षणोक्ता॥ चैत्योग्रामादिप्रसिद्धिहेतुर्महावृक्षः श्वभ्रंविदीर्णभूभागः॥
हारीतः ॥ नचत्वरोपद्वारयोर्मूत्रपुरीषेकुर्यान्नतीर्थेनसस्यसंपन्नेनयज्ञियानांवृक्षाणामध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तात् ॥चत्वरंनानाजनावस्थानदेशःकाकादिबलिस्थानमितिकेचित्॥उपद्वारंद्वारसमीपं
तीर्थेपुण्यदेशे जलावतरणमार्गइत्येके॥ आपस्तम्बः॥ छायायांमूत्रपुरीषयोःकर्म्मवर्जये
त्स्वांत्ववमेहेत् ॥ छायायांपथिकाद्युपजीव्यच्छायायां नोपजीव्यच्छायायामितिस्मृत्यन्त
रात् ॥स्वान्त्ववमेहेदिति अनुज्ञाबलाच्च पुरुषान्तरछायापिनिषिद्धा॥तथा॥नसोपानत्को
मूत्रपुरीषेकुर्यात् ॥ अत्रमनुः॥नगछन्वापिचस्थितइति ॥ स्थितऊर्द्ध्वः॥शंखलिखितौ॥ ना
नंतर्वासाः कुर्यात् ॥ मूत्रपुरीषेइतिशेषः॥ गौतमः ॥ नवाय्वग्निविप्रादित्यापोदेवतागा
श्चपश्यन्मूत्रपुरीषामेध्यान्युदस्येत् ॥ देवताविष्ण्वादिप्रतिमाः अमेध्यानिश्लेष्मादीनि
॥ अत्रयाज्ञवल्क्यः ॥ नप्रत्यर्काग्निगोसोमसन्ध्याम्बुस्त्रीद्विजन्मनइति ॥ अत्रसांख्या
यनगृह्यं ॥ नादित्याभिमुखोनजघन्येनिंद्यस्थाने हन्तिमेहयतःप्रज्ञांप्रतिपंथानमेवच ॥
विष्णुपुराणे ॥ तिष्ठेन्नातिचिरंतत्र ॥ तत्रमूत्रपुरीषस्थाने ॥ हारीतः ॥ लोष्ठेनप्रमृजीत शु
ष्ककाष्ठेनवाप्रमृजीत ॥ गुदलिंगेइतिशेषः॥लोष्ठेनेतिशुष्ककाष्ठाभावे ॥ नपर्णलोष्ठाश्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिर्मूत्रपुरीषापकर्षणंकुर्यादिति गौतमनिषेधात् ॥ व्यासः ॥ नाश्ममूलफलांगारैरुन्मृ
जेन्नास्थिबर्हिषा ॥ आपस्तम्बः ॥ आर्द्रानोषधिवनस्पतीनाछिद्यमूत्रपुरीषयोः स्त्रंसन
कर्मवर्जयेत् ॥ अथशौचम् ॥ मनुः ॥ गृहीतशिश्नश्चोत्थायमृद्भिरभ्युद्धृतैर्जलैः ॥ गंधलेप
क्षयकरंशौचंकुर्यादतंद्रितःअतंद्रितोऽनलसः ॥ एतच्चऋष्यन्तरविहितसंख्यानुवादार्थम्
अतोगंधलेपक्षयादेवशौचं॥ संख्यादिनियमस्त्वदृष्टार्थइतिव्याख्यानमशुद्धं॥शुद्धिमभी
प्सतेतिश्रवणाच्च ॥ ब्रह्मपुराणे ॥ उद्धृतोदकमादायमृत्तिकांचैववाग्यतः ॥ उदङ्मुखोदि
वाकुर्याद्रात्रौचेद्दक्षिणामुखः ॥ मृत्तिकाग्रहणंकण्ठासक्तमृद्धात्रीतः हारीतानुसारात्॥तद
संभवेन्यतोपिकुर्यात्॥शौचमितिशेषः॥ यमः॥आहरेन्मृत्तिकांविप्रःकूलात्ससिकतांतथा
नाखूत्कृष्टान्नवल्मीकात्पांशुलान्नचकर्दमात् ॥ नमार्गान्नोखराच्चैवशौचशिष्टापरस्यया ॥
विप्रइतिशौचकर्तृमात्रोपलक्षणं कूलादितिचशुद्धदेशोपलक्षणं ॥ विष्णुपुराणे ॥वल्मीक
मूषकोत्खातांमृदमन्तर्जलात्तथा ॥ शौचावशिष्टांगेहाच्चनादद्याल्लेपसंभवां॥अन्तःप्राप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वपन्नांचहलोत्खातांचपार्थिव॥ परित्यजेन्मृदस्त्वेताः सकलाशौचसाधने॥अन्तःप्राप्यव
पन्नांसकीटां॥अथब्रह्मपुराणे॥सुनिर्णिक्तेमृदंदद्यान्मृदंतेलापएवहि॥सुनिर्णिक्तेकेवलज
लप्रक्षालिते॥ तथाचगौतमः॥गंधलेपापकर्षणेशौचममेध्यस्यतदद्भिःपूर्वंमृदाचेति॥ एवं
चसुनिर्णिक्तपदंकाष्ठादिप्रोञ्छितगुदानुवादकमित्ययुक्तंव्यर्थत्वाच्च अतएवसुनिर्णिक्तेसु
प्रक्षालितेपाद्यादाविति कल्पतरुव्याख्यातं॥मनुः॥एकालिंगेगुदेतिस्त्रस्तथैवैककरेदश॥
उभयोःसप्तदातव्यामृदःशुद्धिमभीप्सता॥एककरेवामे॥शंखः॥मृत्तिकातुसमादिष्टात्रि
पर्वापूयतेयया॥अयंचपरिमाणविधिर्गुदंविहायबोद्धव्यः॥अर्द्धप्रसृतिमात्रातुप्रथमामृत्ति
कास्मृता॥ द्वितीयाचतृतीयाचतदर्द्धापरिकीर्तिता॥इतिदक्षेणगुदेपरिमाणान्तरविधाना
त्॥अत्रच लिंगेमृत्तिकाद्वयं गुदेपंच सप्तवामकरे चतुर्दशविंशतिर्वात्रिंशद्वाहस्तद्वये चतु
र्दश षोडशवामृत्तिकाःस्मृत्यंतरेविहितास्ताश्चलेपानुवृत्तिशंकायांबोद्धव्याः॥अन्यथामा
नवकल्पएव बहुभिःसंवादान्मानवपक्षेऽपिवामकरपृष्ठेषण्मृत्तिकादेयाः॥ षट्पृष्ठतइति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हारीतवचनात् ॥ अत्रयमः ॥ तिस्रस्तुमृत्तिकादेयाःकृत्वातुनखशोधनं ॥ हस्तयोरितिशे
षः॥एवंचपुनःसप्तमृत्तिकाइतिब्रह्मपुराणीयंलेपशंकायां॥पुनर्यमः॥तिस्रस्तुपादयोर्देयाः
शुद्धिकामेननित्यशः ॥ तिस्रइतिप्रतिपादम् ॥ एतच्चात्यंतशंकायामन्यथातुप्रतिपादमेकै
का पादयोर्द्वे इतिब्रह्मपुराणात् ॥ मनुः ॥ एतच्छौचंगृहस्थानांद्विगुणंब्रह्मचारिणां ॥ त्रि
गुणंतुवनस्थानांयतीनांतुचतुर्गुणं ॥ इदंतुद्वैगुण्यादिसंख्यामात्रे तदनंतरमेवाभिधानात्
न्यूनाधिकंनकर्त्तव्यंशौचंशुद्धिमभीप्सतेतिदक्षोक्तं संख्यापरिमाणोभयपरंविशेषाभावा
त्॥एवंच॥यावत्साध्वितिमन्येततावच्छौचंविधीयते॥प्रमाणंद्रव्यसंख्यावानशिष्टैरुपदि
श्यते॥इतिदेवलवचनंचातुराश्रम्यादन्यत्र तत्रसंख्यादेरश्रवणात् उदकविषयंवा ॥दात
व्यमुदकंतावद्यावात्स्यान्मृत्तिकाक्षयइतिदक्षेणोक्तत्वात् ॥ आपस्तम्बः ॥ अह्निशौचंय
थाप्रोक्तंनिश्यर्द्धंतुतदिष्यते ॥ पथिपादस्तुविज्ञेयआर्त्तःकुर्याद्यथाबलं ॥ ऋष्यश्रृंगः ॥ य
स्मिन्स्थानेकृतंशौचंवारिणातच्चशोधयेत्॥नशुद्धिस्तुभवेत्तस्यमृत्तिकांयोनशोधयेत्॥मूत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मात्रोत्सर्गेदक्षः ॥ एकालिंगेतुसव्येत्रिरुभयोर्मृद्द्वयंस्मृतं ॥ बौधायनः ॥ मूत्रवद्रेतसःसमुत्सर्गे ॥ देवलः ॥ धर्मविद्दक्षिणंहस्तमधःशौचेनयोजयेत् ॥ तथैववामहस्तेननाभेरूर्द्ध्वंनशोधयेत् ॥ प्रकृतिस्थितिरेषास्यात्कारणादुभयक्रिया ॥ कारणाद्रोगादेः उभयक्रिया दक्षिणहस्तेनाधःकायशोधनंवामहस्तेनऊर्द्ध्वकायशोधनम् ॥ शौचानंतरं ॥ हारीतः ॥ गोमयेनमृदावाकमण्डलुंपरिमृज्यपूर्ववदुपस्पृश्यादित्यंसोममग्निंवावीक्षेत ॥ अत्रदिवाआदित्यंरात्रौसोममुभयोरभावेऽग्निमितिबोद्धव्यम्॥ब्रह्मपुराणे॥ पादयोर्द्वेगृहीत्वाचसुप्रक्षालितपाणिना ॥त्रिराचम्यततः शुद्धःस्मृत्वाविष्णुंसनातनं ॥अत्रशंखलिखितौ॥ आचम्येशानंमनसाध्यायेत् ॥ व्यासः ॥ शौचंकृत्वामूत्रोच्चारौनपश्येत् ॥ दृष्ट्वादित्यमग्निंसोमंवापश्येत् ॥ अत्रवसिष्ठेनगोब्राह्मणदर्शनमधिकमुक्तम् ॥ ॥ अथाचमनविधिः ॥ ॥ तत्र देवलः ॥ प्रथमंप्राङ्मुखःस्थित्वापादौप्रक्षालयेच्छनैः ॥ उदङ्मुखोवादैवत्येपैतृकेदक्षिणामुखः ॥ शिखांबद्ध्वावसित्वा द्वे निर्णिक्तेवाससीशुभे ॥ एवमेतद्दर्शनात्प्रत्यक्पादाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेचनमित्यापस्तंबीयं पश्चिमाभिमुखत्वंकेवलपादप्रक्षालनविषयं॥तथा॥ इत्येवमद्भिरा
जानुप्रक्षाल्यचरणौपृथक् ॥ हस्तौचामणिबंधाभ्यांपश्चादासीतसंयतः ॥ अथापःप्रथ
मात्तीर्थाद्दक्षिणात्त्रिःपिबेत्समम् ॥ अशब्दमनवस्त्रावमबहिर्जान्वबुद्बुदम् ॥ आजान्विति
अध्वभ्रमणादिनातत्पर्यंतमशौचे ॥ आजंघाभ्यां पादाविति हारीतोक्तेः ॥ अत्रभविष्य
पुराणे ॥ समौतुचरणौकृत्वातथाबद्धशिखोनृप ॥ तथा ॥ घनांगुलिकरंकृत्वाएकाग्रः सु
मनाद्विजः ॥ नरसिंहपुराणे ॥ दक्षिणंतुकरंकृत्वागोकर्णाकृतिवत्पुनः ॥ त्रिः पिबेद्वीक्षि
तंतोयमास्यंद्विःपरिमार्जयेत् ॥ मनुः ॥ ब्राह्मेणविप्रतीर्थेननित्यकालमुपस्पृशेत् ॥ काय
त्रैदशिकाभ्यांवानपित्र्येणकदाचन ॥ विप्रइतिआचमनकर्तृमात्रोपलक्षणम् ॥ आचम
नोद्देशेनतीर्थाभिधानात् कायंप्राजापत्यं त्रैदशिकंदैवं अत्रसम्भवेब्राह्मतीर्थेनैवाचमनं
नित्यकालमितिश्रवणात् ब्राह्मणादिनाब्राह्मतीर्थावरोधेकायत्रैदशिकाभ्यामिति व्यव
स्थितोविकल्पःपित्र्यंतुसदानिषिद्धं ॥ नपित्र्येणकदाचनेत्यभिधानात् ॥ याज्ञवल्क्यः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रंकरस्यच ॥ प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥ दे
शिनीतर्जनी ॥ हारीतः ॥ अन्तरूर्वोर्हस्तौकृत्वात्रिरथाशब्दंपिबेत् ॥ याज्ञवल्क्यः ॥
अद्भिस्तुप्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः ॥हृत्कंठतालुगाभिश्चयथासंख्यंद्विजातयः ॥
शुद्ध्येरन्स्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरंततः ॥ अन्ततओष्ठप्रांततः ॥आपस्तम्बः॥भूमिगता
स्वप्स्वाचम्यप्रयतोभवति ॥यद्वा प्रयतआचामेद्भूमिगतास्वितिउद्धरणस्थानमपेक्षितं उ
द्धृत्यपरिप्लुताभिरद्भिरितिशंखवचनात् ॥ गौतमः ॥ शुचौदेशेआसीनोदक्षिणबाहुंजान्वं
तरेकृत्वायज्ञोपवीत्यामणिबन्धात्पाणीप्रक्षाल्यवाग्यतोहृदयस्पृशस्त्रिश्चतुर्वाअपआचा
मेत् ॥ पादौचाभ्युक्षेतखानिचोपस्पृशेत् ॥ शीर्षण्यानिचमूर्द्धनिदद्यात् ॥ हृदयस्पृशइति
ब्राह्मणपक्षे चतुर्वैतित्रिराचामतोऽपरितोषपक्षे एवंचतुर्वैतिफलभूमार्थमितिव्याख्यानम
शुद्धं कल्पनाप्रसंगात् खानिइन्द्रियाणि उपस्पृशेदपइत्यन्वीयते ॥ तदुक्तंगोभिलगृह्ये
इन्द्रियाण्यद्भिः संस्पृशेत् अक्षिणीनासिकेकर्णाविति ॥ मनुरप्याह ॥ खानिचैवंस्पृशेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्भिरिति ॥ दक्षः ॥ प्रक्षाल्यहस्तौपादौच त्रिःपिबेदम्बुवीक्षितम् ॥ संवृत्यागुष्ठमूलेनद्विः
प्रमृज्यात्ततोमुखं ॥ संहत्यतिसृभिः पूर्वमास्यमेवमुपस्पृशेत् ॥ अंगुष्ठेनप्रदेशिन्याघ्राणं
पश्चादनंतरं ॥ अंगुष्ठानामिकाभ्यांचचक्षुःश्रोत्रेपुनःपुनः ॥ कनिष्ठांगुष्ठयोर्नाभिंहृदयंतुत
लेनवै ॥ सर्वाभिश्चशिरः पश्चाद्बाहूचाग्रेणसंस्पृशेत् ॥ तिसृभिस्तर्जनीमध्यमानामिका
भिः अत्रघ्राणस्यचक्षुषः श्रोत्रस्यचस्पर्शनंपुटद्वये तदभिप्रायेणपुनःपुनरिति बाहुस्पर्शनं
चांसदेशे ॥तथाचशंखः॥तर्जन्यंगुष्ठयोगेनस्पृशेन्नासापुटद्वयं ॥ अंगुष्ठमध्यमायोगेस्पृशे
न्नेत्रद्वयंततः ॥ अंगुष्ठानामिकायाश्चयोगेनश्रवणेस्पृशेत् ॥ कनिष्ठांगुष्ठयोगेनस्पृशेत्
स्कंधद्वयंततः ॥ इन्द्रियस्पर्शनानंतरं॥भविष्यपुराणे ॥ यद्भूमावुदकंवीरसमुत्सृजतिमान
वः ॥ वासुकिप्रमुखान्नागांस्तेनप्रीणातिभारत ॥ देवलः ॥ सोपानत्कोजलस्थोवामुक्तके
शोऽपिवाद्विजः॥उष्णीषीवापिनाचामेद्वस्त्रेणोद्वेष्ट्यवाशिरः ॥नगछन्नशयानश्चनचलन्नप
रान्स्पृशन्॥नहसन्नैवसंजल्पन्नात्मानंचैववीक्षयन्॥केशान्नीवीमधःकायमस्पृशन्धरणी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मपि॥ यदिस्पृशतिचैतानिभूयःप्रक्षालयेत्करम्॥आत्मानंहृदयंवीक्षयन्नितिस्वार्थेणिच्॥
अधःकायोनाभ्यपेक्षया ॥व्यासः॥ शिरःप्रावृत्यकण्ठंवामुक्तकक्षशिखोऽपिवा॥ अकृत्वा
पादयोःशौचमाचांतोऽप्यशुचिर्भवेत् ॥अत्रब्रह्मपुराणे॥कण्ठंशिरोवाप्रावृत्यरथ्यापणग
तोऽपिवा ॥ आपणःक्रयविक्रयभूमिः ॥ प्रचेताः ॥ नानंतर्वासानशब्दंकुर्वन्नचामेध्येअन
न्तर्वासाअन्तर्वस्त्रशून्यः ॥ अत्रगोभिलः ॥ नांतरीयैकदेशेनकल्पयित्वोत्तरीयकं॥बौधाय
नः॥ दानमाचमनंहोमंभोजनंदेवतार्चनम्॥ प्रौढपादोनकुर्वीतस्वाध्यायंपितृतर्पणं॥आ
सनारूढपादस्तुजानुनोर्जंघयोस्तथा ॥ कृतावसिक्थिकोयश्चप्रौढपादः सउच्यते ॥ म
रीचिः॥ नबहिर्जानुर्नत्वरयानासनस्थोनचोत्थितः॥ नपादुकास्थोनान्यचित्तःशुचिः प्रय
तमानसः॥ तथा॥ भुक्तासनस्थोप्याचामेन्नान्यकालेकदाचन ॥ गोभिलः ॥ जानुभ्यामू
र्द्ध्वमाचम्यजलेतिष्ठन्नदुष्यति ॥ पैठीनसिः॥ अन्तरुदकमाचान्तोऽन्तरेवशुद्ध्यति॥बहिरु
दकमाचान्तोबहिरेवशुद्धोभवति ॥ तस्मादन्तरेकंपादंकृत्वाचामेत्सर्वशुद्धोभवति॥व्यासः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपःपाणिनखाग्रेणआचामेद्यस्तुवैद्विजः ॥ सुरापानेनतत्तुल्यमित्येवमृषिरब्रवीत् ॥ बौ
धायनः॥पादप्रक्षालनेनोच्छिष्टेनचनाचामेत् यद्याचामेत्किंचित्तुभूमौस्त्रावयित्वाचामेत् ॥
आपस्तम्बः ॥ नाग्न्युदकशेषेणवृथाकर्माणिकुर्वीत॥आचामेद्वापाणिनासंक्षुब्धेननैकपा
ण्याऽऽवर्जितेननाचामेत् ॥तथा ॥ नवर्षधारास्वाचामेत् ॥ नप्रदरोदकेननतप्ताभिश्चाका
रणात् ॥ प्रदरोविदीर्णभूभागः॥अकारणात् रोगादिव्यतिरिक्तेन ॥ अतएववसिष्ठः॥ प्र
दरादपियोग्यास्तागोतर्पणायाःस्युः॥नवर्णरसदुष्टाभिर्याश्चस्युरशुभागमाः ॥अत्रशंख
लिखितौ ॥ नशूद्राशुच्येकपाण्यावर्जिताभिः ॥ अत्राशुचिनाएकपाणिनापरेणावर्जितंज
लंनिषिद्धंशूद्रसाहचर्यात् ॥मूत्रपुरीषेकुर्वन्दक्षिणहस्तेगृण्हातिसव्यआचमनीयमितिबौ
धायनेनवामकरेकमण्डलुधारणविधानाच्चेतिप्रपंचितंछंदोगाह्निके ॥ अथाचमननिमित्ता
नि॥तत्रपैठीनसिः॥उच्छिष्टरेतोविण्मूत्रंसंस्पृश्योन्मृज्याचम्यप्रयतोभवति त्रिःप्रक्षाल्य
चतंदेशं ॥ आचमनप्रक्षालनयोरर्थक्रमेणपाठक्रमबाधः ॥ मनुः ॥ वसाशुक्रमसृङ्मज्जा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूत्रंविट्कर्णविण्णखाः ॥ श्लेष्माश्रुदूषिकास्वेदाद्वादशैतेनृणांमलाः॥ बौधायनः॥आददी
तमृदोऽपश्चषट्सुपूर्वेषुशुद्धये ॥ उत्तरेषुचषट्स्वद्भिःकेवलाभिर्विशुध्यति ॥ अत्रप्रक्षालना
नंतरमाचमनं॥ तथाचदेवलः॥उच्छिष्टंमानवंस्पृष्ट्वाभोज्यंवापितथाविधं ॥ तथैवहस्तौपा
दौचप्रक्षाल्याचम्यशुद्ध्यति ॥ यदंभःशौचनिर्मुक्तंक्षितिंप्राप्यविनश्यति ॥ प्रक्षाल्याशुचि
लिप्तंचसंस्पृश्याचम्यशुध्यति ॥ यदंभइत्यादिशौचइत्यादिजलार्द्रितभूभागंसंस्पृश्याशु
चिलिप्ताङ्गंच प्रक्षाल्याचम्यशुध्यतीत्यर्थः ॥ बौधायनः ॥ नीवींविस्रस्यपरिधायोपस्पृशे
त् ॥ आपस्तम्बः ॥ स्वप्नेक्षुवथौसिंहाणिकायाअश्रुलंभेलोहितस्यकेशानामग्नेर्गवांब्राह्म
णस्यस्त्रियाश्चालंभेमहापथंगत्वाऽमेध्यंचोपस्पृष्ट्वाऽप्रयतंचमनुष्यं नीवींपरिधायोपस्पृशे
त्॥ क्षुवथौहिक्कायांसिंहाणिकायाअश्रुणश्चस्पर्शे ॥ तथा रिक्तपाणिर्वयसउद्यम्योपस्पृ
शेत् ॥शक्तिविषयेनमुहूर्त्तमप्यप्रयतःस्यात्॥ रिक्तपाणिःशून्यपाणिर्वयसःपक्षिणः उद्य
म्य पाणिमितिशेषः॥ विष्णुः॥ पञ्चनखास्थिनिःस्नेहंस्पृष्ट्वाचामेत् ॥चांडालम्लेच्छसंभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षणेच॥ हारीतः॥स्त्रीशूद्रोच्छिष्टाभिभाषणेमूत्रपुरीषोत्सर्गदर्शनेदेवतामभिगन्तुकामआ
चामेत् ॥ तथारथ्यामाक्रम्यसुषुप्सुः॥तथाजलानुवृत्तोनोत्तरेदनुपस्पृश्य॥यमः॥उत्तीर्यो
दकमाचम्यावतीर्योपस्पृशेत्ततः॥ यएवंश्रेयसायुक्तोवरुणश्चैवपूजितः॥मन्वङ्गिरोबृहस्प
तयः॥सुप्त्वाक्षुत्त्वाचभुक्त्वाचनिष्ठीव्योक्त्वानृतंवचः॥पीत्वाचयोध्येष्यमाणश्चाचामेत्प्रयतो
पिसन् ॥ संवर्त्तः॥ चर्मारंरजकंवेणुंधीवरंनटमेवच॥ एतान्स्पृष्ट्वानरोमोहादाचामेत्प्रयतो
पिसन् ॥ ब्रह्मपुराणे ॥ अधमवर्णस्यसंलापेसुप्तेवादन्तधावने ॥ आचम्यप्रयतोभूत्वात
तःशुद्धोभवेन्नरः ॥ अधमवर्णश्चाण्डालादिः ॥ वायुपुराणे ॥ निष्ठीवनेतथाभ्यङ्गेतथापा
दावसेचने ॥ उच्छिष्टस्यचसंभाषादशुच्युपहतस्यच ॥संदेहेषुचसर्वेषुशिखांमुक्त्वातथैव
च ॥ विनायज्ञोपवीतेन नित्यमेवमुपस्पृशेत् ॥ उच्छिष्टस्यापिसंस्पर्शेदर्शनेचान्त्यज
न्मनाम् ॥ सर्वेषुआचमनानाचमननिमित्तेषु विनायज्ञोपवीतेनेतियज्ञोपवीतमोचनमा
चमननिमित्तमुक्तं॥अत्रस्नानमध्यपतितान्याचमननिमित्तान्यग्रेवक्ष्यामः॥ ॥अथद्विरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चमननिमित्तानि ॥ ॥ अत्रयाज्ञवल्क्यः ॥ ॥ स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वारथ्योपसर्पणे ॥
आचांतःपुनराचामेद्वासोऽपिपरिधायच ॥ पैठीनसिः ॥ कलिलकासश्वासापगमेरथ्याच
त्वरश्मशानान्निष्क्रम्याचांतः पुनराचामेत् ॥ कलिलंकठिनश्लेष्मा श्वासोऽत्रविकृतः॥अ
न्यस्यसदातनत्वात् ॥ यमः ॥ सकर्दमेतुवर्षासुप्रविश्यग्रामसंकरं ॥ जंघाभ्यांमृत्तिकास्ति
स्रः पद्भ्यांतुद्विगुणाःस्मृताः ॥एतत्प्रक्षालनंरथ्याक्रमणनैमित्तिकाचमनात्प्राक्॥ वसिष्ठः॥
आचांतःपुनराचामेद्वासोऽपिपरिधायच ॥ ओष्ठौसंस्पृश्यचतथायत्रस्यातामलोमकौ ॥
॥ आपस्तंबः ॥ भोक्ष्यमाणस्तुप्रयतोऽपिद्विराचामेत् द्विः प्रमृजेत् ॥ शंखलिखितौ॥मूत्र
पुरीषष्ठीवनादिषुचशुक्लवाक्याभिधानेषुचपुनरुपस्पृशेत् ॥शुक्लंपरुषं॥ अत्रद्विराचमनेपा
णिपादप्रक्षालनंसकृदेवदृष्टैक्यात् ॥ आस्यमार्जनंपुनरावर्त्तते दृष्टभेदात्॥आस्यस्पर्शा
दिकमप्यावर्त्तते अदृष्टार्थत्वात् ॥ आचांतस्यपुनराचमनविधानात् सांगस्यैवावृत्तिः॥अ
तएवत्रिरभ्यस्तमाचमनमावर्त्तते॥नतुद्विरित्यनेनत्रिरित्यस्यबाधः ॥ ॥ अथाचमना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुकल्पविधिः ॥ ॥ तत्रमार्कण्डेयपुराणे ॥ ॥ कुर्यादाचमनंस्पर्शंगोपृष्ठस्यार्क
दर्शनं ॥ कुर्वीतालंभनंवापिदक्षिणश्रवणस्यच ॥ यथाविभवतोह्येतत्पूर्वाभावेततःपरम्॥
नविद्यमानेपूर्वेस्मिन्नुत्तरप्राप्तिरिष्यते ॥ पराशरः ॥ क्षुतेनिष्ठीवितेचैवदंतश्लिष्टेनृतेतथा॥
पतितानांचसम्भाषेदक्षिणंश्रवणंस्पृशेत् ॥ अत्रबौधायनः ॥ आर्द्रंतृणंभूमिंगोमयंचोप
स्पृशेत् ॥ तत्रापस्तंबः ॥ आर्द्रंवाशकृत् ओषधिंवाभूमिंवा ॥ शकृद्गोमयं ॥ अथाचमना
पवादः॥तत्रापस्तंबः॥नश्मश्रुभिरुच्छिष्टोभवति अंतरास्येसद्विर्यावन्नहस्तेनस्पृशति ॥
॥ वसिष्ठः ॥ नश्मश्रुगतोलेपः अशुचिरितिशेषः ॥ गौतमः ॥ दन्तश्लिष्टेदंतवत् ॥अन्यत्र
जिह्वाभिमर्षणात् ॥प्राक्च्युतेरित्येके ॥ च्युतेरास्त्रावबद्धिद्यान्निगिरन्नेवतच्छुचिः ॥ प्राक्
च्युतेरित्येकइतिजिह्वाश्लिष्टमपिदन्तलग्नंयदिनच्यवते तदाशुद्ध्यतीत्यर्थः॥ तेनदन्तलग्नं
जिह्वास्पृष्टमाचमनार्थमाकर्षणीयं ॥यदिनच्यवतेतदादन्तलग्नेसत्याचमनंनकर्त्तव्यम् ॥
॥ तथादेवलः ॥ भोजनेदन्तलग्नानिनिर्हृत्याचमनंचरेत् ॥ दंतलग्नमसंहार्यंलेपंमन्येत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दंतवत् ॥ नतत्रबहुशःकुर्याद्यत्नमुद्धरणेपुनः ॥ भवेदशौचमत्यर्थंतृणवेधाद्व्रणेकृते ॥ च्यु
तेरित्यादि यद्दन्तलग्नमाचमनोत्तरंच्यवतेतदास्त्रावबल्लालावन्निगिरन्नेवशुध्यति ॥ तथाव
सिष्ठः ॥ दंतवद्दंतलग्नेषुयच्चाप्यंतर्मुखेभवेत् ॥ आचांतस्यावशिष्टंस्यान्निगिरन्नेवतच्छुचिः ॥
यच्चापीति दंतच्युतमप्यन्नकणादियत् प्रमादावशिष्टमाचमनोत्तरमुपलभ्यतेतदपिनि
गिरन्नेवशुद्ध्यतीत्यर्थः ॥ शंखः ॥ दंतवद्दंतलग्नेषुरसवर्जं ॥ मनुः ॥ नोच्छिष्टंकुर्वतेमुख्याविप्रुषोङ्गंनयंतियाः ॥ अस्यायमर्थः मुखच्युताजलबिंदवोभूमिपतिताः स्पृष्टाअपिशुचयः
अंगलग्नास्तुरोमद्वयक्लेदसमर्थाआचमनहेतवः ॥ तथाचपैठीनसिः ॥ भूमिगताबिंदवःप
रामृष्टाः पूताविप्रुषःशुद्धाःद्विलोमच्छिन्नेष्वाचामेत् ॥ तथा ॥ स्पृशंतिबिंदवःपादौयआचा
मयतःपरान् ॥ भूमिगैस्तेसमाज्ञेयानतैरप्रयतोभवेत् ॥ अत्र्यंगिरसौ ॥ मधुपर्केचसोमेच
अप्सुप्राणाहुतीषुच ॥ नोच्छिष्टस्तुभवेद्विप्रोयथात्रेर्वचनंतथा ॥ अप्सुउच्छिष्टतानिषेधात्
पीत्वापइतिनैमित्तिकमाचमनं ॥ प्रयतोपीतिश्रवणाच्च ॥ एवंचपीत्वापइत्याचमनविधिभया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दप्स्वित्यपोशनविषयंप्राणाहुतिसन्निकर्षादितिकल्पतरुकारादीनांव्याख्यानमशुद्धम्॥
शातातपः॥ दंतलग्नेफलेमूलेभक्ष्येस्नेहेतथैवच॥ तांबूलेचेक्षुखंडेचनोच्छिष्टोभवतिद्विजः॥
फलेकटुतिक्तकषायेजातीफलादौसमाचारादित्याहुः भक्ष्येकटुकषाये॥ तथाचात्रलघुहा
रीतः॥ कषायकटुताम्बूलेभुक्तस्नेहानुलेपने॥ मनुः॥उच्छिष्टेनतुसंस्पृष्टोद्रव्यहस्तःकथंच
न॥ अनिधायैवतद्द्रव्यमाचांतःशुचितामियात्॥ द्रव्यमन्नपानादिव्यतिरिक्तं॥ तथाच
बृहस्पतिः॥ प्रचरंश्चान्नपानेषुयदोच्छिष्टमुपस्पृशेत्॥ भूमौनिधायतद्द्रव्यमाचम्यप्र
चरेत्पुनः॥ अरण्येऽनुदकेरात्रौचौरव्याघ्राकुलेपथि॥कृत्वामूत्रंपुरीषंचद्रव्यहस्तोनदुष्य
ति॥ शौचंतुकुर्यात्प्रथमंपादौप्रक्षालयेत्ततः॥ उपस्पृश्यतदभ्युक्ष्यगृहीतंशुचितामियात्
द्रव्यहस्तोगृहीतद्रव्यः द्रव्यपदंचासंकुचितमेव॥ कृत्वामूत्रंपुरीषंचद्रव्यहस्तः कथंचन॥
भूमावन्नंप्रतिष्ठाप्यकृत्वाशौचंयथाविधि॥तत्संयोगात्तुपक्वान्नमुपस्पृश्यततःशुचिरित्याप
स्तंबवचनात्॥ प्रक्षाल्यपादौनिक्षिप्यआचम्याभ्युक्षणंपुनः॥ पुष्पादीनांतृणादीनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोक्षणंहविषांतथेतिवायुपुराणवचनाच्च ॥ निक्षिप्यद्रव्यंभूमौधृत्वेत्यर्थः ॥ ॥ अथदं
तधावनं ॥ ॥ तत्रदक्षः ॥ ॥ उषःकालेतुसंप्राप्तेशौचंकृत्वायथाविधि ॥ ततः स्नानंप्रकुर्वीत
दंतधावनपूर्वकं ॥ उषःकालः संध्यातःपूर्वंप्राचीप्रकाशवान् ॥ याज्ञवल्क्यः ॥ प्रातःसंध्या
मुपासीतदंतधावनपूर्वकं ॥ अत्रस्नानेसंध्यायांचदंतधावनस्यनाङ्गत्वं ॥ मुखेपर्युषितेनि
त्यंभवत्यप्रयतोनरः॥ तस्मात्पूर्वंप्रयत्नेनभक्षयेद्दंतधावनामितिवृद्धशातातपेनाऽऽचमनव
त्स्वतंत्रस्यैवशुद्धिहेतुतयाभिधानात्॥एवंचदंतान्प्रक्षाल्यस्नायादितिछंदोगपरिशिष्टेपि
कालार्थः संयोगः ॥ छंदोगपरिशिष्टे ॥ उत्थायनेत्रेप्रक्षाल्यशुचिर्भूत्वासमाहितः॥परिज
प्यचमंत्रेणभक्षयेद्दंतधावनं ॥ आयुर्बलंयशोवर्च्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमे
धांचत्वन्नोधेहिवनस्पते ॥ शुचिर्भूत्वाचम्येत्यर्थः ॥ मंत्रेणायुर्बलमित्यादिनावक्ष्यमाणेन
भक्षयेदितिदंतघर्षणाभिप्रायं ॥ तदुक्तमत्रैव ॥ नारदाद्युक्तवार्क्षेयमष्टांगुलमपाटितं ॥
सत्वचंदंतकाष्ठंस्यात्तदग्रेणप्रधावयेदिति ॥ अत्रनृसिंहपुराणे ॥ प्रादेशमात्रमपिवावस्त्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुलमथापिवा ॥ विष्णुः ॥ कनीन्यग्रसमस्थौल्यंसकूर्च्चद्वादशांगुलं॥ प्रातर्भुक्त्वाचयतवा
ग्भक्षयेद्दंतधावनं॥ सकूर्च्चचूर्णिताग्रं भुक्त्वाचेतिभोजनोत्तरं दंतलग्ननिर्हरणार्थंदंतधावन
मित्यर्थः ॥ भोजनेदंतलग्नानिनिर्हृत्याचमनंचरेदितिदेवलवचनात् ॥ एवंचात्रदंतधावने
कालादिनिषेधोनादर्त्तव्यः सामर्थ्यात् ॥ हलायुधनिबंधेतु ॥ भुक्त्वेतियतिविषयतयाव्या
ख्यातं॥तथा अद्यादुदङ्मुखः प्राङ्मुखोवा ॥महाभारतेतथा॥प्रक्षाल्यपादौहस्तौचमुखं
चसुसमाहितः ॥ दक्षिणंबाहुमुद्धृत्यकृत्वाजान्वंतरंततः ॥ प्राङ्मुखश्चोपविष्टश्चभक्षयेद्दं
तधावनं ॥ दक्षिणंबाहुमुद्धृत्यउपवीतीभूत्वेत्यर्थः ॥ विष्णुः ॥ प्रक्षाल्यभुक्त्वातज्जह्याच्छुचौ
देशेप्रयत्नतः ॥ नरसिंहपुराणे ॥ तस्माच्छुष्कमथार्द्रंवाभक्षयेद्दंतधावनं ॥ खादिरश्चकदं
बश्चकरंजश्चवटस्तथा ॥ तित्तिणीवेणुपृष्ठश्चआम्रनिम्बौतथैवच ॥ अपामार्गश्चबिल्वश्च
अर्कश्चोदुंबरस्तथा॥एतेप्रशस्ताः कथितादंतधावनकर्मणि॥ दन्तकाष्ठस्यवक्ष्यामिसमा
सेनप्रशस्ततां ॥ सर्वेकंटकिनःपुण्याःक्षीरिणश्चयशस्विनः ॥ अत्रविष्णुः ॥ वटासनार्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खदिरकरंजकरवीरसर्ज्जारिमेदापामार्गमालतीककुभविल्वानामन्यतमं कषायंकटुतिक्तं वा ॥ असनःआसनइतिप्रसिद्धः सर्ज्जःशालः अरिमेदोविट्खदिरः ॥ अत्रहारीतः ॥ बिल्वखदिराम्रपौलासशिरीषापामार्गाणामेकतमं पौलासःआम्रातकः तथापालाशकोविदारश्लेष्मातकतिल्वकशाकवृक्षनिर्गुण्डीशिखंडिवेणुवर्ज्जं ॥ तिल्वकःचील्हइतिप्रसिद्धः शिखंडीमयूरशिखा वेणुनिषेधस्त्वंगिरविषयः शाकवृक्षःसगमनइतिप्रसिद्धः प्लक्षमाषकरवीरकरंजशमीशिंशपाइत्येके दधित्थहरीतक्यऽश्वत्थशालामलकानिइत्यपरे एकेपरेइत्युभयत्रवर्ज्जयित्वेतिशेषः॥तथानार्द्रेनाशुचिनातिशुष्कंनातिस्थूलमपोथिताग्रमनोष्ठग्रंथि॥अनार्द्रमितिसद्यश्छिन्ननिवृत्त्यर्थम् विधिस्तुपूर्वमीषदार्द्रस्य अपोथिताग्रम् अचूषिताग्रम् अनोष्ठग्रंथि ओष्ठस्पर्शिग्रंथिरहितं ॥ विष्णुः ॥ नश्लेष्मातकारिष्टबिभीतकधवधन्वनजलकोविदारशमीपीलुपिप्पलेंगुदीगुग्गुलुजं नबर्व्वूरनिर्गुंडीशिग्रुतिलकतिंदुकजं नपारिभद्राम्लिकामोचकाशाल्मलीशणजम् नमधुरंनाम्लंनोर्द्ध्वशुष्कंनसुषिरंनपू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिगंधिनपिच्छलं॥धन्वनःधामनिरितिप्रसिद्धः निर्गुंडीसिंदुवारः॥ महाभारते॥ त्याज्यं सपत्रमज्ञातमूर्द्ध्वशुष्कंचपाटितं॥ त्वग्विहीनंग्रंथिमुखंतथापालाशशांशिपं॥ ऋजुंवितस्तिमात्रंचकीटाग्निभिरदूषितं॥ ऋजुमित्यादिनाविधिः॥ ॥उशनाः॥ ॥नांगुलीभिर्दंतान्प्रक्षालयेत्॥ अत्रचशौचार्थदंतधावनेविहितखदिरादिद्रव्यविशेषाभावेसामान्यशास्त्रानुग्रहायसर्वशक्तिन्यायात्द्रव्यांतरोपादानशक्तौपालाशादिनिषेधाः सार्थकाः॥अत्रमहाभारते॥ पर्वस्वपिचवर्जयेत्॥ नृरासिंहपुराणे॥ प्रतिपद्दर्शषष्ठीषुनवम्यांचैवसत्तमाः॥ दंतानांकाष्ठसंयोगोदहत्यासप्तमंकुलं॥ अलाभेदंतकाष्ठानांप्रतिषिद्धदिनेतथा॥ अपांद्वादशगंडूषैर्मुखशुद्धिर्विधीयते॥ ॥अथप्रातःस्नानादि॥ ॥तत्रछंदोगपरिशिष्टे॥ कात्यायनः यथाहनितथाप्रातःस्नायान्नित्यमनातुरः॥ दंतान्प्रक्षाल्यनद्यादौगेहेचेत्तदमंत्रवत्॥ अल्पत्वाद्धोमकालस्यबहुत्वात्स्नानकर्मणः॥प्रातर्न्नतनुयात्स्नानंहोमलोपोविगर्हितः॥ गेहेइत्युद्धृतजलस्नानोपलक्षणं नद्याद्यभावेविधानात्॥ विष्णुः॥प्रातःस्नाय्यरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णकरग्रस्तांप्राचीमवलोक्यस्नायात् ॥ अरुणकरग्रस्तामितिसंध्यापूर्वकालपरंसंध्यायां
निषेधादितिहरिहरः ॥तदयुक्तं॥संध्यापूर्वकालेऽपिरात्रित्वेननिषेधात् ॥ तस्मादरुणकर
ग्रस्तामित्यसंकुचितमेव॥अतएवतत्रतत्रसंध्यास्नानकीर्त्तनम्॥अत्रचउदयात्प्राक्प्रातः
स्नानविधानात् ॥ सूर्योदयंविनानैवस्नानदानादिकाःक्रियाइति मार्कण्डेयपुराणमितर
विषयं ॥तथा॥अलक्ष्मीःकालकर्णीचदुःस्वप्नंदुर्विचिंतितं ॥अम्मात्रेणाभिषिक्तस्यनश्यंत
इतिधारणा ॥ कालकर्णीराक्षसी अम्मात्रेणेतिमंत्रादिकंविनापीत्यर्थः धारणानिश्चयः
॥दक्षः॥प्रातःस्नानंप्रशंसंतिदृष्टादृष्टकरंहितं॥सर्वमर्हतिपूतात्माप्रातःस्नायीजपादिकं ॥
दृष्टंकर्माधिकारः अदृष्टंजपादिद्वारापरलोकसिद्धिः॥एतच्चसर्वमर्हतीत्यनेनैववक्तव्यम्॥
अदृष्टंपापक्षयइतिकेचित् ॥ नरसिंहपुराणे॥पूर्वांसंध्यांसनक्षत्रामुपासीतयथाविधि॥गा
यत्रीमभ्यसेत्तावद्यावदादित्यदर्शनम् ॥ अनुदितहोमीतरविषयमेतत् ॥दक्षः॥ सन्ध्याक
र्म्मावसानेतुस्वयंहोमोविधीयते॥तत्रानुकल्पमाह॥ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ट्पतिः ॥ एतैरेवहुतंयत्तुतद्धुतंस्वयमेवहि॥विट्पतिर्जामाता॥वराहपुराणे ॥ उदयान्निःसृ
तंसूर्यंयस्तुभक्त्यानरोद्विजः ॥ दध्यक्षतांजलिभिस्तुतिसृभिःपूजयेच्छुचिः ॥ तस्यभावप्र
पन्नस्याशुभंयत्समुपार्जितम् ॥ तत्क्षणादेवनिर्दग्धंभस्मीभवतितस्यतत् ॥ मनुः ॥ मैत्रं
प्रसाधनंस्नानंदन्तधावनमंजनम् ॥ पूर्वाण्हएवकुर्वीतदेवतांनाञ्चपूजनम् ॥ पूर्वाण्हएवे
तिपुरीषोत्सर्गेसतिसम्भवेनियमः॥केशप्रसाधनेचोत्सवादिनिमित्ताभावे दन्तधावनेभो
जनोत्तरविहितेतरे अंजनेभेषजेतरेसौवीरांजनादौ स्नानेदेवपूजनेचमध्याह्नादिविहि
तेतरे ॥ विष्णुपुराणे ॥ आचान्तश्चततःकुर्यात्पुमान्केशप्रसाधनम् ॥ आदर्शांजनमङ्ग
ल्यदूर्वाद्यालम्भनानिच ॥ छन्दोगपरिशिष्टे ॥ श्रोत्रियंसुभगाङ्गाञ्चअग्निमग्निचितंतथा॥
प्रातरुत्थाययः पश्येदापद्भ्यः सविमुच्यते॥ तथा ॥ पापिष्ठंदुर्भगांमद्यंनग्नमुत्कृत्तनासिक
म् ॥ प्रातरुत्थाययः पश्येत्तत्कलेरुपलक्षणम् ॥ अष्टभागंदिनंविभज्यप्रथमभागकृत्ये
॥ दक्षः ॥ देवकार्यन्ततःकृत्वा गुरुमङ्गलवीक्षणम् ॥ गुरुःपित्रादिःमङ्गलंश्रोत्रियादिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ मनुः ॥ देवतामभिगच्छेत्तु धार्मिकांश्चद्विजोत्तमान् ॥ ईश्वरञ्चैवरक्षार्थंगुरुमेवचपर्वसु ॥
॥ छागलेयोयमोऽपिद्वितीये ॥ यतीनान्दर्शनञ्चैव स्पर्शनम्भाषणन्तथा ॥ कुर्व्वाणःपूयते
नित्यंतस्मात्पश्येत्तुनित्यशः ॥ अग्निचित्कपिलासत्रीराजाभिक्षुर्महोदधिः ॥ दृष्टमात्राःपु
नन्त्येतेतस्मात्पश्येत्तुनित्यशः॥सत्रीअन्नादिसत्रशीलः कृतसत्रयागइत्येके॥भिक्षुर्य्यतिः
॥ महाभारते ॥ यज्वामिष्टान्नदःसत्रीशतायुर्धार्म्मिकःशुचिः ॥ ज्ञानसिद्धांस्तपःसिद्धान्
दृष्ट्वापापात्प्रमुच्यते ॥ वराहपुराणे॥ ब्राह्मणं वामनं दृष्ट्वा वराहञ्च जलोत्थितम् ॥ नमस्ये
च्चैवयोभक्त्यासपापेभ्यः प्रमुच्यते ॥ ब्रह्मपुराणे ॥ स्वमात्मानंवृतेपश्येद्यदीच्छेच्चिरजी
वितुं ॥ आत्मानंशरीरम् ॥ नारदः॥लोकेऽस्मिन्मङ्गलान्यष्टौब्राह्मणोगौर्हुताशनः ॥ हिर
ण्यंसर्प्पिरादित्यआपोराजातथाष्टमः॥ एतानिसततंपश्येन्नमस्येच्चार्च्चयेच्चयः॥प्रदक्षिणं
चकुर्वीततथास्यायुर्नहीयते ॥ वामनपुराणे॥कृत्वाशिरः स्नानमथाह्निकंचसम्पूज्यतोयेन
पितृन्सदेवान् ॥ होमञ्चकृत्वालभनंशुभानांततोबहिर्निर्गमनंप्रशस्तम्॥ दूर्वादधिसर्पिर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थोदकुम्भंधेनुंसवत्सांवृषभंसुवर्णम् ॥ मृद्गोमयंस्वस्तिकमक्षतानि लाजामधुब्राह्मणक
न्यकाश्च ॥ श्वेतानिपुष्पाणितथाशमींच हुताशनञ्चन्दनमर्कबिंबम् ॥ अश्वत्थवृक्षञ्चस
मालभेततत्तस्तुकुर्य्यान्निजजातिधर्म्मम् ॥ देशानुशिष्टंकुलधर्म्ममग्र्यंस्वगोत्रधर्म्मंनहिस
न्त्यजेच्च ॥ आह्निकमहःस्नानम् एतच्चाभ्युदयादौ ॥ अरुग्दिवाचरेत्स्नानंमध्याह्नात्प्राग्वि
शेषतइतिवसिष्ठवचनात् ॥ यदिवाह्निकंसर्वमहःकृत्यमुच्येत तदासम्पूज्येत्यादिव्यर्थं
स्यात् ॥ सम्पूज्यतोयेनेतितर्प्पणपरं ॥ आलभनंस्पर्शनं ॥ शुभानांवक्ष्यमाणदूर्वादीनाम् ॥
स्वस्तिकोभवनप्रभेदः ॥ अर्कबिम्बसमालभनम् निरीक्षणे पर्यवसितम् ॥ दक्षः ॥ द्वितीयेच
तथाभागे वेदाभ्यासोविधीयते ॥ वेदस्वीकरणम्पूर्वंविचारोऽभ्यसनंजपः ॥ तद्दानंचैव
शिष्येभ्योवेदाभ्यासोहिपञ्चधा ॥ समित्पुष्पकुशादीनांसकालःसमुदाहृतः ॥ स्वीकर
णमध्ययनम् ॥ एतच्चब्रह्मचारिणः ॥ ग्रहस्थस्याप्यनधीतवेदादिभागे ॥ तथाच आ
पस्तम्बः ॥ ययाविद्ययाचविरोध्येततांपुनराचार्यमुपेत्यसाधयेदिति ॥ याज्ञवल्क्यः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ वेदार्थानधिगच्छेच्चशास्त्राणिविविधानिच ॥ यमः ॥ दानेनतपसायज्ञैरुपवासव्रतै
स्तथा ॥ नतांगतिमवाप्नोतिविद्ययायामवाप्नुयात् ॥ विद्ययाब्रह्मविद्ययेति व्याख्या
नमशुद्धं शास्त्रानुक्रमेणाभिधानात् ॥ दक्षः ॥ तृतीयेचतथाभागेपोष्यवर्गार्थसाधनम्॥
॥ गौतमः ॥ योगक्षेमार्थमीश्वरमधिगच्छेत् ॥ ॥ अथस्नानविधिः ॥ ॥ तत्रदक्षः ॥
चतुर्थेचतथाभागेस्नानार्थंमृदमाहरेत् ॥ शातातपः ॥ शुचौदेशेतुसाग्राह्याशर्क्कराश्मादिव
र्जिता ॥ रक्तागौरीतथाश्वेतामृत्तिकात्रिविधास्मृता ॥ नमृदंनोदकंवापिननिशायांतुगो
मयं ॥ नगोमूत्रंप्रदोषेतुगृण्हीयाद्बुद्धिमान्नरः॥ निशायामितिनमृदंनोदकमित्यत्रापिसंब
ध्यते ॥ तथा ॥ वल्मीकाखूत्कराल्लेपाज्जलाच्चपथिवृक्षयोः॥ कृतशौचावशिष्टाचनग्राह्याः
सप्तमृत्तिकाः ॥ आखूत्करोमूषकोत्कीर्णमृत्तिकास्थानं ॥लेपः कुड्यादीनाम्॥ दक्षः ॥मृत्ति
काःसप्तनग्राह्यावल्मीकेमूषकोत्करे॥अन्तर्जलेश्मशानेचवृक्षमूलेसुरालये ॥परस्नानाव
शिष्टाचश्रेयस्कामैःसदाबुधैः॥व्यासः॥स्नानंमध्यदिनेकुर्यात्सुजीर्णेऽन्नेनिरामयः॥एवंच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वप्नमध्ययनंस्नानमुच्चारंभोजनंहुतिं॥ उभयोःसंध्ययोर्नित्यंमध्याह्नेचविवर्जयेत् इतिदे
वलीयोनिषेधोरागप्राप्तस्नाने॥मध्यान्होत्राभिजिद्वेला॥पंचमभागेभोजनस्यवक्ष्यमाण
त्वात् ॥योगियाज्ञवल्क्यः॥उभेसंध्येचस्नातव्यंब्राह्मणैर्गृहमाश्रितैः॥ तिसृष्वपिचसंध्या
सुस्नातव्यंचतपस्विना॥उभेसंध्येचप्रातर्मध्यान्हेचतपस्विनावनस्थेनयतिनाच॥बौधाय
नः ॥अम्भोवगाहनंस्नानंविहितंसार्ववर्णिकम् ॥विष्णुः॥ उद्धृताद्भूमिष्ठमुदकंपुण्यंस्थाव
रात्प्रस्रवंतस्मान्नादेयंतस्मादपिसाधुगृहीतंसर्वतएवगाङ्गम् ॥शंखः॥आद्भिर्गात्राणिशुध्यं
तितीर्थस्नानाद्भवेत्फलं ॥ मनुः॥ नदीषुदेवखातेषुतडागेषुसरःसुच॥स्नानंसमाचरेन्नित्यं
गर्तप्रस्रवणेषुच ॥ देवखातेषुसूर्य्यादिदेवसमीपखातेषुप्रस्रवणेषुनिर्झरेषु नित्यमित्यु
क्तेर्जीवदधिकारः ॥ सवस्त्रोऽहरहराप्लवतेतिसांख्यायनगृह्यात् ॥ अथातोनित्यस्नान
मितिकात्यायनाच्च ॥एवंचनित्यस्नानेनद्यादीनामंगत्वं॥त्रिरात्रफलदानद्यइत्यपिनित्य
स्नानप्रकरणस्थवचनाद्गुणफलतापि ॥ प्रकरणान्तरोक्ततीर्थस्नानंस्वर्गादिफलकंसाधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारमेवेति ॥ छन्दोगपरिशिष्टे ॥ धनुःसहस्राण्यष्टौचगतिर्यासांनविद्यते॥ नतानदीशब्द
वहागर्त्तास्ताःपरिकीर्तिताः॥ धनुर्हस्तचतुष्कं॥तथा॥पव्यद्वयंश्रावणादिसर्वानद्योरजस्व
लाः ॥ तासुस्नानंनकुर्वीतवर्जयित्वासमुद्रगाः ॥ उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच ॥
चंद्रसूर्यग्रहेचैवरजोदोषोनविद्यते ॥ पव्योमासः ॥ मनुः ॥ नस्नानमाचरेद्भुक्त्वानातुरो
नमहानिशि ॥ नवासोभिःसहाजस्त्रंनाविज्ञातेजलाशये ॥ नभुक्त्वानमहानिशीतिनिषेध
श्चांडालादिस्पर्शनिमित्तकस्नानेनास्ति॥नाप्रयतःक्षणमपितिष्ठेदितिबोधनात्॥महानि
शारात्रिमध्यस्थप्रहरद्वयं॥नातुरइतिरोगस्यस्नानसंवर्द्धनीयत्वेनदृष्टार्थत्वात्॥अविज्ञाते
ऽगाधतयानक्रादिरहिततयाच॥कृत्रिमेप्रतिष्ठिताप्रतिष्ठितत्वाभ्यामपि॥ देवलः॥ राहुदर्श
नसंक्रांतिविवाहात्ययवृद्धिषु ॥ स्नानदानादिकंकुर्य्यान्निशिकाम्यव्रतेषुच ॥ अत्ययोमृ
तकं वृद्धिः पुत्रजन्मादिः ॥ वामनपुराणे॥ स्नायाच्छिरःस्नानतयाननित्यंनाकारणंचैवस
दानिशासु ॥ ग्रहोपरागंस्वजनातियातंमुक्त्वाचजन्मर्क्षगतंशशाङ्कम् ॥ शिरःस्नानतया

Nepal Sanskrit University, Bahadur Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिरोनैक्यार्थं वैधंतुनित्यस्नानंकर्त्तव्यमेव ॥ अकारणमित्यनेनरागप्रयुक्तजलक्रीडादि
निवृत्तिः॥आपस्तंबः॥ साशिरोवमज्जनमप्सुवर्जयेदस्तमितेचस्नानं ॥ साशिरोवमज्जनंशि
रोनैक्यार्थं हरिहरेणअशिरोवमज्जनमितिपठितं॥गात्रप्रक्षालनमात्रमपिजलंप्रविश्यन
कर्त्तव्यमितिव्याख्यातम्॥अत्रचास्तमितमात्रेस्नाननिषेधात्॥नरात्रौनमहानिशीतिदो
षातिशयार्थंदृष्टार्थंवा ॥ तत्रविष्णुः॥ नसंध्यायांरागप्राप्तजलक्रीडादिस्नाननिषेधोयंवैध
स्यसंध्यायांविधानात् ॥ हारीतः ॥ नचत्वरोपद्वारयोःस्नायात् ॥ शंखलिखितौ ॥ ननग्नः
स्नायात् ॥ अत्रनग्नस्नाननिषेधात् पूर्वंचनवासोभिरितिवस्त्रबहुत्वनिषेधात्॥ एकवस्त्र
त्वेद्विवस्त्रत्वंचाविरोधि ॥ नार्द्रमेकंचवसीतेतिपुरुषार्थत्वान्नस्नानविधौदोषमावहति ॥ अ
थवा ॥ होमदेवार्चनाद्यासुक्रियास्वाचमनेतथा॥नैकवस्त्रःप्रवर्त्तेतद्विजवाचानिकेजपे॥इ
तिविष्णुपुराणे एकवस्त्रतानिषेधाद्विवस्त्रतानियमएव ॥ अत्रव्यासः ॥ नभुक्तालंकृ
तोरोगी ॥ शंखलिखितौ ॥ अमेध्योदकंपरिहरेत् तथा नसमुद्रोदकमवगाहेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगियाज्ञवल्क्यः ॥ प्रभूतेविद्यमानेतुविमलेतुमनोहरे ॥ नाल्पोदकेद्विजःस्नायान्नदीं
चोत्सृज्यकृत्रिमे ॥ विष्णुः ॥ नपरनिपानेषुस्नानमाचरेत् ॥ आचरेद्वापञ्चपिण्डानुधृ
त्यापदि ॥ परनिपानेषुपरकृतजलाशयेषु ॥ पञ्चपिण्डाननुद्धृत्यनस्नायात्परवारिणि ॥
निपानकर्त्तुःस्नात्वातुदुष्कृतांशेनलिप्यतइतिमनुस्मरणात् ॥ पञ्चपिंडानिति सेतुकूप
व्यतिरिक्तजलाशये ॥ निरुद्धासुचमृत्पिंडान्कूपात्तुत्रीन्घटांस्तथेतिबौधायनदर्शनात् ॥
निरुद्धासुचनस्नायादंशभाक्तत्रसेतुकृत् ॥ तत्रप्रांचः ॥ अप्रतिष्ठितमात्रेतुपिंडोद्धारस्त
स्यैवपरकीयत्वादित्याहुस्तन्नेतिहरिहरादयः ॥ अप्रतिष्ठितजलत्वेनतत्रस्नानाभावात् प
रस्वोपयोगेचौर्यापत्तेर्मन्वादौपरकृतस्वरूपस्यपरकीयत्वावगमाच्च॥योगि याज्ञवल्क्यः॥
अग्राह्याआगताआपोनद्याःप्रथमवेगिकाः ॥ प्रक्षोभिताश्चकेनापियाश्चतीर्थाद्विनिःसृ
ताः ॥ गंगादिप्रवाहाद्विछिन्नाः ॥ तथा पादेनपाणिनावापियष्ट्यावस्त्रेणचोदकम् ॥ ना
पहन्यान्नापवदेन्नचप्रक्षोभयेद्बुधः ॥ शंखलिखितौ ॥ नाप्सुमेहेन्नोद्वर्षणंकुर्यात् ॥ उ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वर्षणंगात्रमलप्रक्षालनम् ॥ बौधायनः ॥ आपोदेवगृहंगोष्ठंयत्रसन्तिचब्राह्मणाअप्रा
क्षाल्यपादौनांतः प्रवेष्टव्यम् ॥ देवलः ॥ ननदीषुनदींब्रूयात्पर्वतेषुचपर्वतं ॥ नान्यत्प्रशं
सेत्तत्रस्थस्तीर्थेष्वायतनेषुच ॥ अंगिराः ॥ विनादर्भैश्चयत्स्नानंयच्चदानंविनोदकम् ॥
असंख्यातंतुयज्जप्तंतत्सर्वंनिष्फलंभवेत् ॥ नस्नानवर्णकयोरग्रंप्रयछेतान्यत्रदेवगुरुब्रा
ह्मणेभ्यः ॥ जाबालिः ॥ त्रयोदश्यांतृतीयायांदशम्यांचविशेषतः ॥ शूद्रविट्क्षत्रियाःस्ना
नंनाचरेयुः कथंचन ॥ यथासंख्यमत्र ॥ आपस्तंबः ॥ अस्पृश्यस्पर्शनेवांतेअश्रुपातेक्षुरे
भगे ॥ स्नानंनैमित्तिकंकार्यंदैवपित्र्यविवर्जितम् ॥ दैवपित्र्यविवर्जितमितिनित्यंनैमित्ति
कंकाम्यंत्रिविधंस्नानमुच्यते ॥ तर्पणंतुभवेत्तस्यअंगत्वेनप्रकीर्त्तितमितिब्रह्मपुराणवच
नात्सामान्यतः प्रसक्तस्यतर्पणस्यचव्यावृत्तिः ॥ यमः ॥ अजीर्णेऽभ्युदितेवांतेश्मश्रुकर्म
णिमैथुने ॥ दुःस्वप्नेदुर्जनस्पर्शेस्नानमात्रंविधीयते ॥ अभ्युदितेऽशुद्धोद्धारादिनाभिव्य
क्ते एतच्चोत्तरकालस्नानप्राप्त्यर्थं अजीर्णावस्थायांनिषेधात् अभ्युदितेवांतेइतिसंबंधेप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्युषितेवांतेइतिविशेषः ॥ दुर्जनोत्रचांडालादिःमात्रपदेनसर्वांगव्यावृत्तिः तस्मादप्रायत्य
निमित्तेस्नानेमज्जनमात्रेणशुद्धिः ॥ गौतमः ॥ पतितचांडालसूतिकोदक्याशवस्पृष्टित
त्स्पृष्टयुपस्पर्शनेसचैलोदकोपस्पर्शनाच्छुद्धोभवति ॥ अत्रचशवस्पर्शिनस्तत्स्पर्शिनश्च
स्पर्शेस्नानविधानात् ॥ उपस्पृश्याशुचिस्पृष्टंतृतीयंवापिमानवः॥हस्तौपादौचतोयेनप्र
क्षाल्याचम्यशुद्ध्यतीतिदेवलवचनंपतितादिस्पर्शिस्पर्शेसंकोचनीयं तत्स्पृष्टिपदंपतिता
दिस्पर्शिनोप्याहेतिकेचित् तदयुक्तं द्वंद्वद्वयगौरवात् एकद्वंद्वेचसन्निहितपरत्वमेवभेदः॥उ
दकोपस्पर्शनंस्नानं॥बौधायनः॥चांडालेनसहाध्वगमनेसचैलस्नानं॥पराशरः॥चैत्यवृक्ष
श्चितिर्यूपश्चांडालः सोमविक्रयी॥एतांस्तुब्राह्मणःस्पृष्ट्वासचैलोजलमाविशेत्॥सचैलोय
द्वस्त्रधरःसन्स्पृष्टस्तद्वस्त्रसहितइत्यर्थः ॥ जलमाविशेदितिवारुणस्नानोपलक्षणं ॥ तथा
श्वकाकैरवलीढस्यनखैर्विदलितस्यच॥ अद्भिःप्रक्षालनंशौचमग्निनाचोपचूडनम् ॥ इयंच
स्नानंविनैवशुद्धिः शिरोव्यतिरिक्तगात्रोपघाते॥उपचूडनंज्वालयास्पर्शनं॥च्यवनः॥ श्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नंश्वपाकंप्रेतधूमंदेवद्रव्योपजीविनंग्रामयाजकंयूपंचितिंचितिकाष्ठंमद्यंमद्यभांडंसस्नेहं
मानुषास्थिशवस्पृष्टंरजस्वलांमहापातकिनंशवंस्पृष्ट्वासचैलमंभोवगाह्यउत्तीर्य्याग्निमुप
स्पृशेद्गायत्र्यष्टशतंजपेत् घृतंप्राश्यपुनःस्नात्वात्रिराचामेत् ॥ अग्निस्पर्शनादिकामकृते
स्मृत्यंतरेस्नानमात्रविधानात्॥आपस्तंबः॥एकांशाखांसमारूढश्चांडालादिर्यदाभवेत्॥
ब्राह्मणस्तत्रआसीनःस्नानेनशुचितामियात् ॥ कालिकापुराणे॥ स्पृष्ट्वारुद्रस्यनिर्माल्यं
सवासाह्याप्लुतःशुचिः ॥ एतदपनीतनिर्माल्येबोद्धव्यं ॥व्यासः ॥ भासवानरमार्जारखरो
ष्ट्राणांशुनांतथा ॥ सूकराणाममेध्यंचस्पृष्ट्वास्नायात्सचैलकम् ॥ लघुहारीतः ॥ श्वविष्ठां
काकविष्ठांवाकंकगृध्रनरस्यच ॥ अधोच्छिष्टंतुसंस्पृश्यसचैलोजलमाविशेत् ॥ अधोच्छि
ष्टंमूत्रोत्सर्गेणाशुद्धम् ॥देवलः॥ मानुषास्थिवसांविष्ठामार्त्तवंमूत्ररेतसी ॥ मज्जानंशोणितं
वापिपरस्ययदिसंस्पृशेत्॥स्नात्वापमृज्यलेपादीनाचम्यशुचितामियात्॥तान्येवस्वानि
संस्पृश्यपूतः स्यात्परिमार्जनात् ॥ तदनंतरमाचमनंप्राप्तमेव ॥ विष्णुः ॥ नाभेरधस्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्प्रबाहुषुचकायिकैर्मलैः सुराभिर्मद्यैर्वांचोपहतोमृत्तोयैस्तदंगंप्रक्षाल्यातंद्रितः शुद्धोभव
ति अन्यत्रोपहतस्तदंगंमृत्तोयैःप्रक्ष्याल्यस्नानेनशुद्धोभवति चक्षुष्युपहतेउपोष्यस्नात्वा
पंचगव्येनशुद्ध्यति दशनच्छदोपहतश्च॥ प्रबाहुर्हस्तः॥ अतंद्रितइत्यात्मनप्राप्त्यर्थम्॥
अन्यत्रउपहतउक्तेतरकायेस्पृष्टः॥ अंगिराः॥ इंद्रियेषुप्रविष्टंस्यादमेध्यंयदिकर्हिचित्॥
मुखेपिऽसंस्पर्शगतंस्नानंतत्रविधीयते॥ शंखः॥ रथ्याकर्दमतोयेनष्ठीवनाद्येनचाप्यथ॥
नाभेरूर्ध्वंनरःस्पृष्टःसद्यःस्नानेनशुद्ध्यति॥ ब्रह्मपुराणे॥ उच्छिष्टेनाथविप्रेणविप्रःस्पृ
ष्टस्तुतादृशः॥ उभौस्नानंप्रकुरुतः सद्यएवसमाहितौ॥ तथा॥ मानुषास्थितुसंस्पृश्यद
ग्धंसस्नेहमेववा॥ स्नायाद्गांसंस्पृशेत्सूर्यंपश्येद्विष्णुमनुस्मरेत्॥ दग्धस्पर्शेकामकृते
स्नानं आचम्यैवचनिःस्नेहमितिमनुवचनात्॥ मनुः॥ वांतोविरक्तःस्नात्वातुघृतप्राश
नमाचरेत्॥आचामेदेवभुक्त्वान्नंस्नानंमैथुनिनःस्मृतम्॥भुक्त्वान्नंवांतइत्यर्थः॥ तेनसद्यो
वमनेआचमनमात्रम्॥ एवकारेणस्नाननिवृत्तिः॥मैथुनिनऋतावितिशेषः॥बृहस्पतिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतितंसूतिकामंत्यंशवंस्पृष्ट्वातुकामतः॥स्नात्वासचैलंस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यति ॥म
नुः ॥ अनुगम्येच्छयाप्रेतंज्ञातिमज्ञातिमेववा ॥स्नात्वासचैलः स्पृष्ट्वाग्निं घृतं प्राश्यविशु
ध्यति ॥ शुद्ध्येदित्यनुवृत्तौविष्णुः ॥ सर्वस्यैव प्रेतस्य बांधवैः सहाश्रुपातंकृत्वास्नानेन
अकृतेऽस्थिसंचयनेसचैलस्नानेन ॥ देवलः ॥ श्वपाकंपतितंव्यंगमुन्मत्तंशवहारकम् ॥
सूतिकांसूयिकांनारींरजसाचपरिप्लुताम् ॥ श्वकुक्कुटवराहांश्चग्राम्यान्संस्पृश्यमानवः ॥
सचैलंसशिरःस्नात्वातदानीमेवशुद्ध्यति ॥ श्वादिभिःशिरःस्पर्शेस्नानं गात्रांतरस्पर्शेक्षा
लनाचमनमात्रम् ॥ तथाच शातातपः ॥ रजकश्चर्मकृच्चैवव्याधजालोपजीविनौ ॥ चैल
निर्णेजकश्चैवनटःशैलूषकस्तथा ॥ मुखेभगस्तथाश्वाचवनितासर्ववर्णगा ॥ चक्रीध्वजी
वध्यघातीग्रामकुक्कुटशूकरौ ॥ एभिर्यदंगंसंस्पृष्टंशिरोवर्जंद्विजातिषु ॥ तोयेनक्षालनंकृ
त्वाआचांतः शुचितामियात् ॥ चक्रीतैलिकः ध्वजीशौंडिकः ॥ विष्णुः ॥ भक्ष्यवर्जंपंचन
खंशवंतदस्थिसस्नेहं ॥ ब्रह्मपुराणे ॥ उदक्यांसूतिकांचैवश्वानमंत्यावसायिनं ॥ नग्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीन्मृतहारांश्चस्पृष्ट्वाशौचंविधीयते ॥ स्नात्वासचैलोमृद्भिस्तुशुद्ध्येद्द्वादशभिर्नरः ॥ एत
देवभवेच्छौचंमैथुनेवमनेतथा ॥ नग्नादयःपाखंडाः मृद्भिःसूतिकादिभिःस्पृष्टमंगंप्रक्षाल
येदितिशेषः ॥ एतदनंतरंस्नात्वेति योज्यम् ॥ मार्कंडेयपुराणे ॥ अभोज्यंसूतिकांषंढमा
र्जाराखुश्वकुक्कुटान् ॥ पतिताविद्धचाण्डालमृतहारांश्चधर्मवित् ॥ संस्पृश्यशुद्ध्यतिस्ना
नादुदक्याग्रामशूकरौ ॥ अत्रमार्जारस्पर्शेस्नानविधानान्मार्जारश्चसदाशुचिरितिवि
ष्णुस्मृतिर्भांडादिविषया ॥ अथवा मार्जारकर्मकेस्पर्शेस्नानविधिः ॥ मार्जारकर्तृके
स्पर्शेदोषाभावइतिव्यवस्था ॥ चाण्डालादिस्पर्शेतुनदोषविशेषव्यवस्था प्रमाणाभाव
त् द्वैविध्याश्रवणाच्चेति ॥ लघ्वास्तम्बः ॥ यद्विष्ठितंकाकबलाकिकाभ्याममेध्यलिप्तं
तुभवेच्छरीरम् ॥ श्रोत्रेमुखेनप्रविशेतसम्यक्स्नानेनलेपोपहतस्यशुद्धिः॥अस्यायमर्थः॥
काकबलाकिकाभ्यांयदुपरिविष्ठाकृतातच्छरीरमशुचिलिप्तंभवति तच्चाशुचियदिश्रोत्र
मुखयोर्नप्रविशतितदास्नानेनैवशुद्ध्यति ॥ एवंमुखादिप्रवेशेप्रायश्चित्तान्तरंसूचितम् ॥

Nepal Sanskrit University, Bahadur Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ व्याघ्रपादः ॥ चाण्डालादिनासंस्पृष्टःस्नानंकृत्वाविशुद्ध्यति ॥ हारीतः ॥ श्वपचमूषक
प्रेतहारकशवान्संस्पृश्यदेवीरापइत्येताभिरन्तर्जलेस्नातःपूतोभवति ॥ अजीर्णवान्त
श्मश्रुकर्मायोनिपशुदिवामैथुनेच ॥ सुमन्तुः ॥ अनुदकमूत्रपुरीषकरणेनखकेशरुधिरप्रा
शनेसद्यः स्नानंघृतकुशहिरण्योदकप्राशनञ्च ॥ शातातपः ॥ अशुचिंसंस्पृशेद्यस्तुएकए
वसदुष्यति ॥ तंस्पृष्ट्वान्योनदुष्येतसर्वद्रव्येष्वयंविधिः ॥ द्रव्येषुमध्वादिषु ॥ अशुचिनर
स्पृष्टस्पर्शिनस्तत्स्पर्शिनश्चाचमनंपूर्वोक्तम्॥यमः॥ आतुरस्नानसंप्राप्तौदशकृत्वस्त्वनातु
रः॥ स्नात्वास्नात्वास्पृशेत्क्षिप्रंततःशुध्येत्सआतुरः ॥ पाराशरः॥ अस्तंगतेयदासूर्येचांडा
लंपतितांस्त्रियम् ॥ सूतिकांस्पृशतश्चैवकथंशुद्धिर्विधीयते ॥ जातवेदःसुवर्णेचसोममार्गत
थैवच ॥ ब्राह्मणानुमतेचैवदृष्ट्वास्नात्वाचशुद्ध्यति ॥ आचांतमनुगर्त्तेवानिशिस्नानंनविद्य
ते ॥ स्नानमाचमनंप्रोक्तंदिवोद्धृतजलेनच ॥ जातवेदाःअग्निः सोममार्गआकाशम् ब्रा
ह्मणानुमतेस्नात्वाऽग्न्यादिकंस्पृष्ट्वाशुद्ध्यतीत्यर्थः॥आचांतमाचमनं अनुगर्त्तंजलाशयम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षिणवामप्रदेशयोः ॥ प्रतिदिशंगृहस्यपूर्वदक्षिणपश्चिमोत्तरासुदिक्षु ॥दिशामासायोरे
चकारात्प्रतिदिशमितिसंबध्यते ॥मध्येगृहस्यब्रह्मणइत्यादित्रयं ॥त्रीनित्यत्रदेवत्पाद्य
यकं ॥ तेषांब्रह्मादिबलीनामुत्तरतउत्तरस्यांदिशि ॥ अपरमंतिमंतेनविश्वेदेवादिबलषा
त्तरस्यांदिशि उत्तरोत्तरंदातव्याइतिसिध्यति ॥ उत्तरापरावायवीदिक् ॥अत्रवदंति ॥ ऐ
यंविधिः साग्नेरेव ॥ अनग्नेर्गौतमेनोक्तोहोमः ॥ शाकलएवच ॥ अनाहिताग्नेरप्येषयुज्य
तेबलिभिःसहेतिवाक्येनिरग्नेः प्रकारान्तराभिधानात् ॥ नचच्छन्दोगपरिशिष्टेश्रवणा
च्छंदोगविषयंप्रकारान्तरं ॥ सर्वशाखाप्रत्ययमेकङ्कर्मेतिन्यायेनसर्वगोचरत्वात्॥किञ्च॥
यदीदंछन्दोगविषयंतदानिरग्निवाजसनेयिनावैश्वदेवेजलोक्ष्यादेवप्रापकाभावात् ॥ किञ्च
चणिकेत्रीनितिश्रवणान्निरग्नेश्चमणिकाभावात्साग्निप्रकृत्यतेति ॥ तदयुक्तं ॥ वैश्वदेवम्प्र
त्राणाग्रशाखाविहितन्नरः ॥ इति व्यासवाक्यात्पारशाखिकवैश्वदेवानुष्ठानायोगात् ॥
प्यमज्ञ ॥ यद्यपिसर्वशाखाप्रत्ययमेकङ्कर्मतथापिस्वशाखाविहितङ्कर्मविहायनान्यशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ व्याघ्र
प्रेतहारक
श्मश्रुकम
शनेस
छति
द्वद्भिस्तद
नस्वशाखाश्रयमितिस्वशाखानुगतमात्रत्वविवक्षितत्वात् ॥ वङ्कल्पंवास्वगृह्योक्तंयस्यय
त्कर्मकीर्तितम् ॥ तस्यतावतिशास्त्रार्थेकृतेसर्वंकृतम्भवेत् ॥ इतिगृह्यपरिशिष्टे ॥ तत्रापि
विशेषविधानाच्च ॥ तस्मान्निरग्निवाजसनेयिनामपिस्वगृह्योक्तएवकल्पइतिमणिकस्यो
दपात्रस्यचलौकिकत्वादनग्निनाप्युपादानमस्तु ॥ अनग्निपक्षेवाउदकुम्भएवास्तु ॥
अद्भ्यउदकुम्भइतिगौतमाभिधानात् ॥ उदपात्रमात्रोपलक्षणंवामणिकपदम् ॥ उयम्
त्रसन्निधावित्यापस्तम्बवचनात् ॥ नचप्रापकाभावः ॥ सामान्यविधेरेवप्रापकत्वा
थाचोद्वाहानन्तरम्॥संवर्त्तः ॥ ततःपञ्चमहायज्ञान्कुर्यादहरहर्द्विजः॥नहानयेतताम्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रूयन्तेहिश्रुतावपि ॥ शतपथश्रुतिः ॥ पञ्चैवमहायज्ञास्तान्येवमहासत्राणि ॥ भूत
मनुष्ययज्ञःपितृयज्ञोदेवयज्ञोब्रह्मयज्ञइत्यहरहर्भूतेभ्योबलिंहरेत् ॥ तथैनम्भूत
माप्नोत्यहरहर्दद्यादुदपात्रात्तथैनंमनुष्ययज्ञंसमाप्नोत्यहरहः स्वधांकुर्यादुदपात्रात्त
पितृयज्ञंसमाप्नोत्यहरहः स्वधांकुर्यादुदपात्रात्तथैनंपितृयज्ञंसमाप्नोत्यहरहः स्वाहाकु
र्यादाकाष्ठातथैनंदेवयज्ञंसमाप्नोत्यऽथब्रह्मयज्ञःस्वाध्यायोवैब्रह्मयज्ञस्तस्यवाएतस्यब्र
ह्मयज्ञस्यवागेवजुहूर्मनउपभृच्चक्षुर्ध्रुवामेधास्त्रुवः स्रुच्यप्रीतानि
ःस्वर्लोकउद्गायनं ॥ याव
त्तंहवाइमांपृथिवींवित्तेनपूर्णांददल्लोकंजयति [illegible]मस्यनमस्कृ
तिभूयासंवाक्षय्यंयएवंवि
द्वानहरहःस्वाध्यायमधीतेतस्मात्स्वाध्यायोऽ[illegible]स्त्रवत्सुचस्नाय
। पञ्चसूनागृहस्थस्यचूल्ली
ष्ण्युपस्करः ॥ कण्डनीचोदकुम्भश्चवध्यतेयांस्तु [illegible]र्निमज्जनंनि
तासांक्रमेणसर्वासांनिष्कृ
चननिर्[illegible]त्मभिः ॥ पञ्चक्लृप्तामहायज्ञाःप्रत्यहंगृहमे[illegible]लंक्षिपेत्
ध्यापनंब्रह्मयज्ञः पितृय
त्राणांग्र[illegible]णं ॥ होमोदैवोबलिर्भौतोनृयज्ञोऽतिथिपूजनं॥सूनाप्राणिवधस्थानं॥ उपस्करः
प्यमज्ज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ व्याघ्री ॥ गृहोपकरणंभांडकुंभादादीत्यपरे ॥ वध्यतेहंतीत्यर्थे आर्षत्वात् ॥ अथवाव
प्रेतहारपाजन्यदुरितेनसंबध्यतेहन्यतेवेत्यर्थः ॥ वाहनुत्सृज्यपन् ॥ तासामित्यादिनाए
स्पापक्षयार्थंपंचमहायज्ञाइत्युक्तम् ॥ एतच्चार्थवा[illegible]यांप श्रुतावहरहः श्रुतेर्जीवद
धिकारावगमात् ॥ अत्रापिप्रत्यहमितिश्रवणा[illegible]तातपःषि[illegible]र्थवादात्सूनाजनितपापक्ष
योऽपि॥एवंचस्वर्गापवर्गयोःसिद्धिंपाकयज्ञैः प्रक्षितत्वात् ॥ वादपिफलांतरमिति प्रत्ये
कमपिफलमास्ति ॥ तथाचहारीतः ॥ यद्देवेभ्योजुहुयात् ॥ इत्किंतेनजयतियत्पितृभ्योद
दातिपितृलोकंतेनजयतियत्स्वाध्यायमधीते ऋषिलोकंतेनजयतियद्भूतेभ्योबलिंहरति
भूतलोकंजयतीति ॥ मनुश्च ॥ धन्यंयशस्यमायुष्यंस्वर्ग्यंचातिथिपूजनं ॥ पितृयज्ञप्र
कारांतरंछंदोगपरिशिष्टे ॥ श्राद्धंवापितृयज्ञःस्यात्पितृभ्योबलिरेववा॥पंचयज्ञप्रकार
माहुर्मनुविष्णुदेवलाः ॥ देवतातिथिभूतानांपितृणामात्मनश्चयः॥ननिर्वपतिपंचान
सन्नसजीवति॥तदेषांवाक्यानासामान्यविषयेतयासाग्निनिरग्निगृहस्थमात्रविषय

विध
म् ब्रा
शयम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्॥ दिविभुव्यंतयज्ञोपवीतीतिद्वितीयवस्त्रधारणार्थमितिकात्यायनभाष्यं तदयुक्तं परि
पृथ्वीचसुभगातस्मात्क्रत्वर्थश्रवणंप्रकरणात् ॥ तेनदैवाद्विनष्टेपियज्ञोपवीतेतदुत्पाद्य
म्याचजाह्नवीरैयति ॥ एवमनियतकेशवेशाःसर्वेषांमुक्तशिखावर्जनमितिनिषेधात्पुरुषा
भवेत्सन्निहितलाभेबद्धशिखीतिक्रत्वंगतालाभार्थं ॥ द्वेष्यंप्रतिनिषिंचेत् द्वेष्यंबुद्धिस्थी
र्याज्जलंभूयसिद्वेष्यस्तिष्ठतितस्यांक्षिपेदित्यर्थः ॥नमस्यनमस्कृत्यआलभेत्स्पृशेत्॥न
क्रांतेविष्णुक्रम्यसूर्याभिमुखइत्यभिधानात्नद्यांस्त्रवत्सुचस्नायात्प्रतिस्त्रोतः स्थितोद्वि
ष्णेनशतबाहुपुराणेविषयांतरेस्नात्वेतिश्रवणात् पुनर्निमज्जनंनिमज्योन्मज्येतिचाऽपर
णिसुव्रते ॥ असिद्धिः ॥ अभिषिंचेत् हस्तेनशिरसिजलंक्षिपेत् अंतेचैतद्वक्ष्यमाणमार्ज
चननिर्देशात्त्रकरणाभिषेककर्मकुर्य्यादित्यर्थः तथैवप्रकृतत्वात् ॥ नत्वेतन्मंत्रजातंवक्ष्य
त्राणांग्राहकत्वेमार्जनएवेतिकल्पना ॥ तत्राभिषेकोमार्जनं च प्रत्यृचमेवेतिलिंगात् ॥ चत
प्यमज्जनंकुरित्यादित्वनेकत्वप्राप्त्यथर्मवनतुमिलितविनियोगार्थमपि ॥दर्भैरितिबहुत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रेतहारपाजन्सेतंकपिंजलन्यायात् ॥ पावयेन्मार्जनंकुर्यात् मार्जनमुदकबिंदूनांशिरसि
श्रस्पापक्षयार्थंपतिर्मेतिप्रतिप्रतीकेनाचित्पतिर्मापुनात्वित्यस्याच्छिद्रेणेतिवाक्यसहितस्यैक
धिकारावगमणद्विलादिसंख्यायाअश्रवणात्॥कल्पसूत्रेतुचित्पतिर्मेतिपावयतिप्रतिमंत्र
योऽपि॥एवंचसर्वत्रेतिदीक्षितपावनेविशेषश्रवणान्मंत्रत्रयग्रहणं ॥ श्रुतावपिप्रत्येकमेव
कमपिफलमास्तियाहृतिभिस्तिसृभिर्लाघवात् प्रणवोभूर्भुवःस्वरित्यादौश्रवणाच्च ॥ गाय
दातिपितृलोकंआपोहिष्ठेत्यादिमन्त्रसाध्यमार्जनाद्यन्तयोर्गायत्र्यामार्जनमितियद्यपिप्र
भूतलोकंजयतीत्यासम्बन्धेनैवोपपत्तेः॥ तथाप्यादावोंकारव्याहृत्यनुष्ठानदर्शनात्तत्सम्ब
कारांतरंछंदोगपाशयउन्नीयते ॥ प्राणायामःकर्त्तव्यइतिशेषः ॥ सशिरइतिक्रियाविशेष
माहुर्मनुविष्णुदेमार्षत्वाच्च॥ ओमितिचानुवर्त्तयेदितिव्यवहितसम्बन्धः॥आवर्त्तयेद्वाप्रण
सन्नसजीवति॥तज्ञवल्क्यदर्शनात् ॥ विष्णोर्वास्मरणंकर्त्तव्यमितिशेषः ॥ गौतमः ॥अन्त
त्रेरावर्त्यसर्वस्मादेनसोमुच्यते ॥ मनुशंखयोगियाज्ञवल्क्याः ॥ यथाश्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापप्रणोदनः ॥ तथाघमर्षणंसूक्तंसर्वपापप्रणोदनम् ॥बृहस्पतिः॥ द्रुप
देवाजसनेयके ॥ अंतर्जलेत्रिरावर्त्यसर्वपापैःप्रमुच्यते॥अंतर्जलेऋष्या
त्॥ दिविभुव्यंत ॥अविदिलातुयःकुर्याद्याजनाध्यापनंजपं ॥ होममंतर्जलादीनितस्यचा
पृथ्वीचसुभगा नियोगियाज्ञवल्क्यदर्शनात् ॥ अथ कातीयस्नानप्रयोगः ॥ ॥ यथोक्तमृ
स्याचजाह्नवीचैयंकुशान्कृष्णतिलान्सुरभिपुष्पाण्यादायसुमनानद्यादिकंगत्वा तत्तीरे
भवेत्सन्निहिता स्थापयेत् ॥ ततःपाणिपादंप्रक्षाल्य कुशहस्तो बद्धशिखी उपवीत्याचामे
र्याज्जलंभूयस्त्रि हराजावरुणश्चकारसूर्यायपंथामन्वेतवाउ॥अपदेपादाप्रतिधातवेकरुता
क्रांतेविष्णुक्रांपिधाश्चित् ॥ नमोवरुणायाभिष्टितोवरुणस्यपाशइतितोयमामंत्र्य ॐ येतेश
ष्णेनशतबाहुत्रंयज्ञियाः पाशावितताम्हांतः ॥ तेभिर्नोअद्यसवितोत्तविष्णुर्विश्वेमुंचंतुम
णिसुव्रते ॥ अ त्रिःप्रदक्षिणंजलमावर्त्तयेत्॥ततःॐ सुमित्रियानआपओषधयःसंतु इति
चननिर्देशात् दाय ॐ दुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मइतिद्वेष्यंप्रतिनिषिं
त्राणांग्राहक
प्यमज्जनंकु

Nepal Sanskrit University, Balaneki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ व्याघ्री ॥ कटिंबस्त्यूरुजंघेचरणौकरौप्रत्येकंमृत्तोयाभ्यांत्रिस्त्रिःप्रक्षाल्य एकंपादंजले
प्रेतहारपाजन्यधायाचामेत् ॥ ततउदकंनमस्कृत्यॐइदंविष्णुर्व्विचक्रमेत्रेधानिदधेपदं ॥
श्मपापक्षयार्थंपंसुरेइतिमृत्तिकयांगानिसंस्पृश्य नाभिमात्रंजलंप्रविश्य ॐआपोअस्मा
धिकारावगमातुघृतेननोघृतप्वःपुनंतु ॥ विश्वंहिरिप्रंप्रवहंतिदेवीरितिमंत्रेणसूर्य्या
योऽपि॥एवंचस्नात् ॥ततः स्नात्वा ॐउदिदाभ्यःशुचिरापूतएमिइतिनिमज्योन्मज्याचम्य
कमपिफलमास्तिनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः ॥ मानोव्वीरानुद्रभामितो
दातिपितृलोकंतेसदमित्वाहवामहे इतिमंत्रेणगोमयेनांगानिविलिंपयेत्॥ततःॐइमंमेव्व
भूतलोकंजयतीप्रिचमृडय ॥ त्वामवस्युराचके ॥ ॐतत्त्वायामिब्रह्मणाव्वंदमानस्तदाशा
कारांतरंछंदोगपरोभिः ॥ अहेडमानोव्वरुणेहबोध्युरुशंसमानआयुःप्रमोषीः ॥ ॐत्व
माहुर्मनुविष्णुदेवयविद्वान्देवस्यहेडोअवयासिसीष्ठाः ॥ यजिष्ठोव्वह्नितमःशोशुचानोवि
सन्नसजीवति॥ततुग्ध्यस्मत् ॥ ॐसत्वन्नोअग्नेव्वमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्॥ दिविभुव्यंतरिक्षेचतानितेसंतिजाह्नवि ॥ नंदिनीत्येवतेनामदेवेषुनालिनीतिच ॥ वृंदा
पृथ्वीचसुभगाविश्वकायाशिवासिता ॥ विद्याधरीसुप्रसन्नातथालोकप्रसाधनी ॥ क्षे
म्याचजाह्नवीचैवशांताशांतिप्रदायिनी ॥ एतानिपुण्यनामानिस्नानकालेप्रकीर्त्तयेत् ॥
भवेत्सन्निहितातस्यगंगात्रिपथगामिनी ॥ सप्तवाराभिजप्तेनकरसंपुटयोजितं ॥ मूर्ध्निकु
र्याज्जलंभूयस्त्रिचतुःपंचसप्तवा ॥ स्नानंकुर्यान्मृदातद्वदामंत्र्यचविधानतः ॥ अश्वक्रांतेरथ
क्रांतेविष्णुक्रांतेवसुंधरे ॥ ॥ मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतम् ॥ उद्धृतासिवराहेणकृ
ष्णेनशतबाहुना ॥ आरुह्यममगात्राणिसर्वपापंव्यपोहय ॥नमस्तेसर्वलोकानांप्रभवारि
णिसुव्रते ॥ आदौसंध्यातर्पणादीनामितिशेषः॥सप्तवाराभिजप्तेनपूर्वोक्तमूलमंत्रेणएकव
चननिर्देशात् ॥ मूलमंत्रत्वेननिर्देशस्यसार्थकत्वाच्च ॥ नत्वेभिर्मंत्रैरित्युपक्रम्यकथितानांमं
त्राणांग्राहकइतिभ्रमःकार्यः॥स्नानंकुर्यादितिअग्रिममंत्रेणमृदमामंत्र्यतयागात्राण्यालि
प्यमज्जनंकुर्यादित्यर्थः॥अयंचस्नानविधिःसर्वशाखिसाधारणःसर्ववर्णसाधारणश्चसंको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेप्रमाणाभावात्पुराणोक्तश्रवणेसर्वाधिकारश्रवणाच्चअनधीतवेदंप्रतिचायमेवस्नानावि
धिःप्रशस्तः ॥ वेदमंत्रशून्यत्वात् ॥ विष्णुः स्नातएवसोष्णीषेधौतवाससीबिभृयात् उ
ष्णीषधारणंशिरोजलप्रच्यवार्थमाचमनात्प्राक् ॥ पराशरः स्नात्वानिवस्यवासोन्यज्जं
घेप्रक्षालयेन्मृदा ॥अपवित्रीकृतेवैतुकौपीनच्युतवारिणा॥कौपीनमधोवस्त्रं ॥ योगियाज्ञ
वल्क्यः ॥ स्नात्वैवंवाससीधौतेअश्लिष्टेपरिधायच ॥ प्रक्षाल्पोरूमृदाद्भिश्चहस्तौप्रक्षा
ल्यवैतथा ॥ अभावेधौतवस्त्रस्यशाणक्षौमाविकानिच ॥ कुतपंयोगपट्टंचद्विवासायेनवै
भवेत्॥ कुतपोनेपालकंबलः ॥ जाबालिः ॥ नार्द्रमेकंचवसनंपरिदध्यात्कथंचन ॥ अत्र
सदातननिषेधबलात्पुरुषार्थता ॥ नरसिंहपुराणे ॥ नरक्तमुल्बणंवासोननीलंचप्रशस्य
ते ॥ मलाक्तंचदशाहीनंवर्जयेदंबरंबुधः ॥ ततः प्रक्षालयेत्पादौमृत्तोयेनविचक्षणः॥ उल्ब
णंव्यक्तंएतच्चरक्तविशेषणंतेनात्यंतरक्तमित्यर्थः ॥ उल्बणमंचलमितिकेचित् ॥ अत्रहा
रीतः ॥ नवासोविधुनुयान्नोत्तरीयविपर्यासंकुर्यात् ॥ विष्णुः ॥ स्नातःशिरोनावधुनेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नांगेभ्यस्तोयमुद्धरेत् नतैलवशेस्पृशेत् नाप्रक्षालितंपूर्वधृतंवावासोबिभृयात् नम्लेच्छां
त्यजपतितैःसहसंभाषणंकुर्यात् ॥ तैलंचवशाचतैलवशे ॥ मार्कण्डेयपुराणे ॥ संप्रमृज्या
न्नचस्नातोगात्राण्यंबरपाणिना ॥ अंबरंस्नानवस्त्रं नस्नानशाट्येतिविष्णुपुराणपाठात्
॥ एवंचनस्नात्वागात्रमवमृज्यादितिहारीतोपिस्नानशाट्यापाणिनाचविशेषणीयः॥एवं
चसमर्थंप्रतिमार्जनमात्राभावोऽसमर्थंप्रतिपाणिशाटीमार्जनाभावइतिहरिहरोक्तमश्रद्धे
यं ॥ सांख्यायनगृह्यं ॥ आप्लुत्याव्युदकोन्यद्वस्त्रमाच्छादयेत् ॥ अव्युदकोऽनुद्धृतोदकः॥
एषोपिपाणिवस्त्राभ्यामुद्धरणेनिषेधःकुलविशेषनियतोवागृह्योक्तत्वात् ॥ अत्रशंखः॥उद
कस्याप्रदानाद्धिस्नानशाटींनपीडयेत् ॥अत्रविष्णुः॥ याम्यंहियातनादुःखंनित्यस्नायी
नपश्यति ॥ नित्यस्नानेनपूयंतेयेपिपापकृतोनराः ॥ योगियाज्ञवल्क्यः ॥ अगम्याग
मनात्स्तेयात्पापेभ्यश्चप्रतिग्रहात् ॥ रहस्याचरितात्पापान्मुच्यतेस्नानमाचरन् ॥ पापे
भ्यः पतितादिभ्यः ॥ छंदोगपरिशिष्टे ॥ संध्यालोपस्यचाकर्तास्नानशीलश्चयःसदा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंदोषानोपसर्पंतिगरुत्मन्तमिवोरगाः ॥ अथसन्ध्योपासनम् ॥ तत्रछन्दोगपरिशिष्टे ॥
॥ अतऊर्ध्वंप्रवक्ष्यामिसंध्योपासनिकंविधिं ॥ अनर्हः कर्मणांविप्रः सन्ध्याहीनोयतःस्मृ
तः ॥ संध्येतिवक्ष्यमाणप्राणायामादिकर्मनाम उपासनंसेवनमनुष्ठानमितियावत् ॥ आ
चारसेवनीत्यादौदर्शनात्॥अतएवसंध्याकृतासन्ध्योपासितेतितुल्यवत्प्रयोगः॥अथवाब्र
ह्मणोपासितासंध्याविष्णुनाशङ्करेणच ॥ कस्तांनोपासयेद्देवींसिद्धिकामोद्विजोत्तमइति
योगियाज्ञवल्क्येनदेवीत्वेनकीर्त्तनात्सन्ध्यारूपायादेवतायावक्ष्यमाणप्राणायामादिनो
पासनमाराधनंसन्ध्योपासनं॥सिद्धिरत्रमोक्षः ॥ अनर्हःकर्मणामित्यादिनासन्ध्योत्तरक
र्मणिकृतसन्ध्यस्याधिकारइत्युक्तम् ॥ अथवा ॥ चिरन्तनसन्ध्यात्यागिनः पतितस्येवद्वि
जातिकर्मानधिकारः ॥ नानुतिष्ठतियःपूर्वांनोपास्तेयश्चपश्चिमाम् ॥ सशूद्रवद्बहिःकार्यः
सर्वस्माद्द्विजकर्मणइतिमनुदर्शनात् ॥ विष्णुपुराणे ॥ सर्वकालमुपस्थानंसन्ध्ययोःपार्थि
वेष्यते ॥ अन्यत्रसूतकाशौचविभ्रमातुरभीतितः ॥ विभ्रमश्चित्तविक्षेपः मेघादिनाका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाज्ञानमित्यन्ये ॥ यद्यप्यत्रमध्याह्नसंध्यानोक्तातथापि एतत्सन्ध्यात्रयम्प्रोक्तम्ब्राह्म
ण्यंयदधिष्ठितम् ॥ यस्यनास्त्यादरस्तत्रनसब्राह्मणउच्यते इतिछन्दोगपरिशिष्टात् ॥
संध्यात्रयंतुकर्त्तव्यंद्विजेनात्मविदासदेतियोगियाज्ञवल्क्याच्चसापिबोद्धव्या ॥ एतेनसं
ध्यात्रयेनित्याधिकारोदर्शितःपापक्षयकामाधिकारोप्यत्र यदाहयाज्ञवल्क्यः॥ दिवावा
यदिवारात्रौयदज्ञानकृतंभवेत् ॥ त्रिकालसंध्याकरणात्तत्सर्वंचप्रणश्यति ॥ सततंसंध्या
निष्णातस्यफलांतरमप्याह यमः ॥ संध्यामुपासतेयेतुसततंशंसितव्रताः ॥ विधूतपापा
स्तेयांतिब्रह्मलोकंसनातनं ॥ संध्याद्वयेप्रत्येकमपिपापक्षयमाह मनुः ॥ पूर्वांसंध्यांजपं
स्तिष्ठन्नैशमेनोव्यपोहति ॥ पश्चिमांतुसमासीनोमलंहंतिदिवाकृतं॥ नन्वेवंकेवलमध्याह्न
संध्यायांकिंप्रमाणंमैवं उत्तीर्यधौतेवाससीपरिधायमृदोरूकरौप्रक्षाल्याचम्यत्रिरायम्या
सूनित्यादिनाकात्यायनेनमध्याह्नस्नानोत्तरंनरसिंहपुराणादौचकेवलायाअपि वक्ष्यमा
णत्वात्॥ एवंचसंध्यात्रयेप्रत्येकमपिकर्त्तव्यतायादर्शितत्वादेकसंध्यालोपेअपरापिनकर्त्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यामिलितगोचरत्वादधिकारस्येतिदुर्मतिः ॥ देशमाहतुः शंखलिखितौ ॥ सव्रतीबहिः
संध्यामुपासीत॥सव्रतीब्रह्मचारीव्रतयुक्ताध्ययनशीलत्वात्॥बहिर्ग्रामात् नैनंग्रामेभिनि
म्लोचेत्सूर्य्योनाभ्युदियात्क्वचिदितिमनुदर्शनात् ॥ एनंब्रह्मचारिणमभिनिम्लोचेत्अ
स्तंयायात्॥गुणफलमाहशातातपः॥अनृतंमद्यगंधंचादिवामैथुनमेवच॥पुनातिवृषलस्या
न्नंबहिःसंध्याह्युपासिता ॥गृहेषुप्राकृतीसंध्यागोष्ठेशतगुणास्मृता॥ नदीषुशतसाहस्त्रीह्य
नंताशिवसन्निधौ ॥ प्राकृतीएकगुणा॥व्यासः॥बहिःसंध्यादशगुणागोष्ठप्रस्त्रवणादिषु ॥
खाततीर्थेशतगुणासाहस्त्रीजाह्नवीजले ॥ संध्याकालपरिमाणमाहयोगियाज्ञवल्क्यः ॥
ऱ्हासवृद्धीहिसततंदिवसानांयथाक्रमं।संध्यामूहुर्त्तमात्रंतुह्रासेवृद्धौचसासमा॥सर्वर्त्तुषुप्रा
तःसंध्यासायंसंध्याचदंडद्वयमेवभवतीति ॥यथा॥संधौसंध्यामुपासीतनास्तगेनोद्गतेरवौ
॥ संधाविति पूर्वंविधानात् ॥ नास्तगइतिसंधिरूपमुहूर्त्तादुर्ध्वंनिषेधानुवादकंसतिसंभवे
सादित्यामारभेदित्येवपरंवा ॥ उपक्रमकालमाहसंवर्त्तः ॥प्रातःसंध्यांसनक्षत्रामुपासीत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाविधि ॥ सादित्यांपश्चिमांसंध्यामर्धास्तमितभास्करां ॥ आदित्यपदमस्तमयप्राच्य
पूर्णबिंबपरं ॥ समाप्तिकालमाहयाज्ञवल्क्यः ॥ जपन्नासीतसावित्रींप्रत्यगातारकोदया
त्॥संध्यांप्राक्प्रातरेवंहितिष्ठेदासूर्यदर्शनात् ॥ प्रत्यक्पश्चिमाभिमुखः प्राक्पूर्वाभिमु
खः आसीतेतिसायंजपेआसीनतार्थम् तिष्ठेदितिप्रातर्जपऊर्ध्वत्वार्थम् मध्यान्हसंध्याज
पेप्यूर्द्ध्वतैव॥तिष्ठेदुदयनात्पूर्वांमध्यमामपिशक्तितःइतिछंदोगपरिशिष्टात्॥ स्नानोत्तरत्वं
मध्याह्नसंध्यायाःप्रागेवोक्तं ॥ मनुः॥ऋषयोदीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः॥प्रज्ञांयशश्च
कीर्तिंचब्रह्मवर्चसमेवच ॥ दीर्घसंध्यत्वंप्रातरुदयावधि सायंचनक्षत्रावधि जपेत् ॥ एतच्च
गुणफलमिति॥वाक्यांतरेपि सूर्यनक्षत्रयोरेवावधित्वंतत्फलार्थमेकमूलत्वानुरोधात्॥ अ
थवासूर्यनक्षत्रयोःप्राक्कालोपिनित्यजपांगतयाबोध्यते॥नतुतत्कालस्यसावित्रीजपेना
भिव्याप्तिरित्यत्रापितात्पर्यं॥उभयपक्षेऽपिकामनाविरहेविहितदशादिसंख्यादरः ॥ का
मिनस्तुदीर्घसंध्यात्वएवश्रवणाज्जपेनकालव्याप्तावेवतात्पर्यं॥अत्रचजपदीर्घत्वेनदीर्घसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्याभिधानात्जपेनसंध्याकर्मसमाप्तिरितिमंतव्यं ॥ उभेसंध्येजपञ्जप्यमुपासीतयथावि
धिइत्यादिनावाक्येषुसावित्रीजपस्यसंध्यांतर्गमःस्फुटः ॥ एवमजपेप्रत्यवायश्रवणंतद
भिप्रायमेव फलश्रुतेतुसावित्रीजपःपृथगपीति॥अघमर्षणसूक्तस्यापोहिष्ठेतितृचस्यद्रु
पदायाश्चऋष्यादिकमुक्त्वा योगियाज्ञवल्क्यः एवंज्ञात्वातुमंत्राणांप्रयोगंवैद्विजोत्तमाः॥
संध्यामुपासयेद्यद्वद्यथावत्तंनिबोधत ॥ अत्राहुः ॥ सर्वेषामेवमंत्राणामादावृष्यादिकंस्मृ
त्वापश्चात्संध्याप्रयोगस्तदयुक्तंएवंह्यंगभूतेनऋष्यादिस्मरणेनसहसर्वेषामेवमंत्राणामा
नंतर्येन्यायागतंबाध्यते॥ॐ कारस्यसप्तव्याहृतीनांसावित्र्याः शिरसश्चऋष्यादिकंस्था
नान्तरेयोगियाज्ञवल्क्येनकथितमितिकथंनतत्पूर्वभावः किंचअघमर्षणसूक्तस्यऋष्या
दिकंप्रथममुक्तंतदेवप्रथमंस्यात्॥तस्माज्ज्ञात्वेतिप्रयोगाद्बहिर्ज्ञानंप्रयोगकालेसौकर्यार्थं
अथवाज्ञात्वोपासयेदितिप्रत्येकमभिसंबध्यते ॥ तेनतत्तन्मंत्रस्यऋष्यादिकंतत्तन्मंत्रप्र
योगात्प्राग् ज्ञातव्यमितिसिध्यति ॥ प्रणवव्याहृतिसावित्रीशिरसांचमिलितानामेवप्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णायामेविनियोगइतितेषांमिलितानामेवऋष्यादिकंस्मृत्वाप्राणायामः ॐ कारस्यश्वेत
वर्णकथनंसावित्र्याश्चाग्निमुखकथनंस्तुतिर्विनियोगाभावात्॥ आर्षंछंदोदैवतंचविनियो
गस्तथैवच ॥ वेदितव्यंप्रयत्नेनब्राह्मणेनविशेषतः॥ इत्यादिनानास्थानेषुचतुर्णामेवा
भिधानात्॥अथऋष्यादिस्मरणेपाठिकक्रमोग्राह्यः॥स्थानांतरेष्वप्यनेनैवक्रमेणऋष्या
दिचतुष्ककथनम्॥एवंपञ्चविधंयोगंजप्यकालेष्वनुस्मरेत् ॥ होमेचान्तर्जलेयोगेस्वाध्या
येयाजनेतथेतिशतपथब्राह्मणांतर्भावेनपञ्चविधत्वंप्रकरान्तरमधिकफलार्थंवा ॥ इदञ्चऋ
ष्यादिस्मरणंयत्रमन्त्रेप्रामाणिकन्ततः प्राक्प्रयोगेएवकर्त्तव्यम् ॥सन्ध्योपक्रमेव्यासः॥
स्मृत्वोंकारञ्चगायत्रींनिबध्नीयाच्छिखान्ततः॥ पुनराचम्यहृदयंनाभिंस्कधौचसंस्पृशेत्॥
यदितस्मिन्कालेमुक्तशिखः स्यात्तदानेनमन्त्रेणशिखांबध्वाआचामेदित्यर्थः ॥नतुसमंत्र
कत्वार्थंपूर्वबद्धापिशिखामोचनीयेतिभ्रमःकार्यः ॥ छन्दोगपरिशिष्टे ॥ सव्येपाणौकुशा
न्कृत्वाकुर्यादाचमनक्रियाम् ॥ सव्यःसोपग्रहःकार्योदक्षिणःसपवित्रकः ॥ सोपग्रहःकु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शान्कृत्वेतिपूर्वोक्तकुशत्रयसमीपे अग्रिमकर्मोपयुक्ताःकुशाधर्त्तव्याइत्युक्तं तत्रकुशस्याकां
क्षितत्वात् उपगृह्यतइत्युपग्रहइतिव्युत्पत्तिसम्भवाच्च ॥ अथपवित्रं ॥ अनन्तर्गर्भिणंसा
ग्रंकौशंद्विदलमेवच ॥ प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित्॥ अनेनैवलक्षितम्॥ ह्रस्वाः
प्रचरणीयाःस्युःकुशादीर्घास्तुबर्हिषः ॥ दर्भाःपवित्रमित्युक्तमतःसन्ध्यादिकर्माणि ॥ अ
स्यार्थः ॥ यतःप्रचरणादौ ह्रस्वादिविधिस्ततः सन्ध्यादौविशेषविध्यभावाद्दर्भमात्रमेवा
ङ्गंनतुपवित्रलक्षणमेतत् पूर्वलक्षणबाधात्॥ अतइत्यन्वयाद्वाक्यभेदापत्तेश्च ॥ अत्रचाच
मनात्प्रागेवपवित्रधारणम्॥आचम्यप्रयतोनित्यंपवित्रेणद्विजोत्तमः ॥नोच्छिष्टस्तुभवेत्त
त्रभुक्तशेषन्तुवर्जयेदितिलघुहारीतदर्शनादन्यत्रजपोपयुक्तकुशत्रयधारणमपिदक्षिणक
रेपवित्रधारणावसरएवकुर्वन्ति॥अविरुद्धञ्चैतत् ॥ लघुहारीतः ॥ दर्भहीनातुयासन्ध्याय
च्चदानंविनोदकम् ॥ असंख्यातञ्चयज्जप्यं तत्सर्वंनिष्फलम्भवेत् ॥ योगियाज्ञवल्क्यः ॥
ऐशान्यभिमुखोभूत्वाशुचिःप्रयतमानसः ॥ आचान्तःपुनराचामेद्दतमित्यभिमन्त्र्यच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आन्तरंशुद्ध्यतिह्येवमन्नपानमलीकृतम् ॥ तथा ॥ पूर्वासन्ध्यातुगायत्रीसावित्रीमध्यमा स्मृता ॥ याभवेत्पश्चिमासन्ध्यासातुदेवीसरस्वती ॥ रक्ताभवतिगायत्रीसावित्रीशुक्लव र्णिका ॥ कृष्णासरस्वतीज्ञेयासन्ध्यात्रयमुदाहृतम् ॥ कामधेन्वादौ श्वेताभवतिगायत्रीसा वित्रीरक्तवर्णिकेतिक्वचित्पाठः एतच्चसन्ध्यारूपकथनंध्यानार्थंस्तुतिमात्रपरंवा ॥ गाय त्रीकालत्रयेपिशुक्लवर्णैवध्येयेतिवक्ष्यते ॥ यासन्ध्यासाचगायत्रीत्रिधाभूत्वाव्यवस्थिते ति॥अभेदाभिधानंस्तुतिः॥पारमार्थिकेप्यभेदेजपोपक्रमेशुक्लायाएवध्यानं॥बृहस्पतिः॥ बध्वासनंनियम्यस्वंस्मृत्वाऋष्यादिकन्ततः ॥ सन्निमीलितदृग्द्वौनीप्राणायामान्समभ्य सेत् ॥ आसनं ॥ पद्ममर्द्धासनंचापितथास्वस्तिकमितिवायुपुराणोक्तम् ॥ स्वमात्मानंनि यम्यासूनितिपाठेप्राणायामपदंमंत्रपरं॥अत्रछंदोगपरिशिष्टे ॥ रक्तांतेवारिणात्मानंपरि क्षिप्यसमंततः ॥ रक्षाकार्यैतिशेषः अंतःशब्दस्यादावपिशक्तत्वात् शिष्टाचारानुरोधात् प्राणायामादावियंरक्षाकार्यैत्यर्थः ॥ कामधेनौतुप्राणायामानंतरमेवलिखितं ॥ शंखवसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टांगिरोबृहस्पतिपैठीनसिबौधायनाः ॥ सव्याहृतिंसप्रणवांगायत्रींशिरसासह ॥ त्रिःप
ठेदायतप्राणःप्राणायामःसउच्यते ॥ व्याहृतंचछंदोगपरिशिष्टे ॥ भूराद्यास्तिस्रएवैता
महाव्याहृतयोऽव्ययाः॥ महर्जनस्तपःसत्यंगायत्रीचशिरस्तथा॥आपोज्योतीरसोऽमृतं
ब्रह्मभूर्भुवःस्वरोमितिशिरः ॥ प्रतिप्रतीकंप्रणवमुच्चारयेदंतेचशिरसः॥ एताएतांसहाने
नतथैभिर्दशभिःसह ॥ त्रिःपठेदायतप्राणः प्राणायामःसउच्यते ॥ प्रतिप्रतीकंसप्तव्या
हृतीनांगायत्र्याःशिरसश्चादावित्यर्थः॥एवंशिरोंतप्रणवमादायदशभवंति॥एताव्याहृतीः
एताङ्गायत्रीं अनेनशिरसा एभिःप्रणवैः आयतप्राणोनियतवातः॥ नियमश्च पूरकेआ
दानमेव कुम्भकेधारणमेव रेचकेत्यागएवेत्येवंरूपः ॥ योगियाज्ञवल्क्यः॥ पूरकरेचक
कुम्भकैःप्राणायामस्त्रिलक्षणोज्ञेयः ॥ त्रिलक्षणस्त्रिविधः॥एतच्चयोगियाज्ञवल्क्यएवपौ
र्वापर्यपरामर्शाद्व्यक्तम्॥एवंचप्रत्येकमेवप्राणायामत्वात्प्रत्येकमेवत्रिरावृत्तोमंत्रपाठः ए
तावतैवप्राणायामत्रयसिद्धिरिति॥अतएवततोंतःशुध्यतित्रिभिरित्युपसंहारः॥ आदानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोधमुत्सर्गवायोस्त्रिस्त्रिःसमभ्यसेदितिव्यासोक्तोनवधाभ्यासः॥पक्षान्तरम्॥ त्रिविधङ्के
चिदिच्छन्तितथैवनवधापरे इत्यनेनाप्यभिधानात्॥ तथाहि॥ नासिकाकृष्टउच्छ्वासो
ध्मातःपूरकउच्यते॥कुम्भकोनिश्चलश्वासोरिच्यमानस्तुरेचकः॥नीलोत्पलदलश्यामंना
भिदेशेप्रतिष्ठितम्॥ चतुर्भुजंमहात्मानं पूरकेणैवचिन्तयेत्॥ कुम्भकेनहृदिस्थानेध्याये
च्चकमलासनम्॥ ब्रह्माणंरक्तगौराङ्गं चतुर्वक्त्रंपितामहम्॥ रेचकेनेश्वरन्ध्यायेल्ललाटस्थं
महेश्वरम्॥ शुद्धस्फटिकसङ्काशंनिर्मलम्पापनाशनम्॥ पूरकेणेत्यादौतृतीयासप्तम्य
र्थे कालोपलक्षणत्वात्॥गौरसर्वाङ्गपाठेगौरपदंरक्तपरंनानार्थत्वात्॥तथाचव्यासः॥रक्त
म्प्रजापतिंध्यायेदिति॥ मात्राभेदान्मृदुमध्यमोत्तमत्वंयोगिप्राणायामविषयं॥ संध्या
प्राणायामकालस्यमन्त्रपाठेनैवावच्छेदात्॥पूरकरेचककुम्भकैर्मिलित्वैकःप्राणायामः॥
कुंभकमात्रएवतुमंत्रपाठइत्याद्यसत्॥पक्षनिरासविस्तरश्छन्दोगाह्निकेनुसंधेयः॥ योगि
याज्ञवल्क्यः॥प्राणस्ययमनंकृत्वाआचामेत्प्रयतोपिसन्॥आतरंविद्यतेयस्मात्तस्मादाच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनंस्मृतं ॥ हेतुनिर्देशस्सर्वस्मिन्नेवप्राणायामेआचमनप्राप्त्यर्थः ॥ अत्रहलायुधनिबंधे
तुप्रक्षालितपाणिपादोऽपआचम्यअग्निश्चमामन्युश्चेतिसायमपःपीत्वा सूर्यश्चमामन्यु
श्चेतिप्रातरिति बौधायनवाक्यमाचमनमंत्रेप्रमाणमुक्तम् ॥ एतच्चवाक्यंसंध्याप्राक्काली
नप्रोक्षणात्प्राक्श्रुतम् ॥ तस्मात्प्राणायामानन्तरमाचमने मंत्रसंबंधेआचारएवप्रमाणं॥
अतएवमध्याह्नेऽपिमंत्रइतिकेचित् ॥ प्रातःसूर्यश्चमेत्युक्त्वासायमग्निश्चमेतिच॥ आपःपुनं
तुमध्याह्नेकुर्यादाचमनंततइतिराजाद्यलिखितंमैत्रायणीयगृह्यपरिशिष्टवचनंप्रमाणमा
हुः ॥ प्राणायामानंतरमापोहिष्ठेत्यादिनामार्जनमाहयाज्ञवल्क्यः ॥ प्राणानायम्यसंप्रो
क्ष्यतृचेनाब्दैवतेनतुइति ॥ विभागमाहव्यासः ॥ विप्रुषोष्टौक्षिपेन्मूर्द्ध्निअधोयस्यक्षया
यचेति ॥ प्रकारमाहछंदोगपरिशिष्टे ॥ शिरसोमार्जनंकुर्यात्कुशैः सोदकबिंदुभिरिति॥य
त्तुयोगियाज्ञवल्क्येनसार्द्धयर्चाधःप्रक्षिप्यसार्द्धयोर्ध्वंतुप्रक्षिपेदितिविभागउक्तःसप्राची
नमार्जने॥एवंसंमार्जनंकृत्वाबाह्यशुद्ध्यर्थकारणम् ॥ अथाभ्यंतरशुद्ध्यर्थंप्राणायामान्सम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्यसेदितिउपसंहारात् ॥ एतच्चसंमार्जनंस्नानासामर्थ्येसंध्यानुकूलशौचार्थमेव बाह्यशु
द्ध्यर्थकारणमितिश्रवणात् ॥ अधिकफलार्थंवा ॥ अतएवबहुभिरननुष्ठानमनावश्यकत्वा
त्कल्पांतरंचेतिपरिभाव्यं ॥ प्राणायामानंतरंमार्जनंसंध्यांतर्गतमितिदर्शितमेव॥अयमपि
संध्यामंत्रक्रमे ॥ प्राणायाममंत्रानंतरमार्जनमंत्रमाह ॥ ॐकारंव्याहृतीःसप्तगायत्रींशिर
सासह ॥ आपोहिष्ठाऋचस्तिस्रःसूक्तंचैवाघमर्षणमिति॥अत्रयद्यप्यापोहिष्ठानंतरमघ
मर्षणमुक्तंतथापिमध्येद्रुपदाबोद्धव्या ॥ सर्वत्रमार्जनंकर्मअब्लिंगानामुदाहृतम् ॥ इत्य
नंतरंद्रुपदाऋष्यादिकमुक्त्वाअपःपुण्याःसमादायत्रिःपठेद्रुपदामृचम्॥ तत्तोयंमूर्द्ध्निविन्य
स्यसर्वपापैःप्रमुच्यते इतिद्रुपदाप्रयोगमुक्त्वा ॥ एवंज्ञात्वातुमंत्राणामित्यादिनासंध्याभि
धानात् ॥ एवंचोक्तएवद्रुपदाप्रयोगःसंध्यायांग्राह्यः ॥ प्रकारांतरेप्रमाणाभावात्॥ अघ
मर्षणप्रयोगस्तुछंदोगपरिशिष्टेदर्शितः॥करेणोद्धृत्यसलिलंघ्राणमासज्यतत्रच ॥ जपेद
नायतासुर्वात्रिःसकृद्वाघमर्षणमिति ॥ अनायतासुर्वेतिविकल्पबलादायतासुरनायतासु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रपि आयतासुपक्षेसकृत् अनायतासुपक्षेत्रिरितिव्यवस्थितविकल्पः॥शंखः॥उपस्पृशेत्त
तःपश्चान्मंत्रेणानेनधर्मतः॥अन्तश्चरसिभूतेषुगुहायांविश्वतोमुखः॥त्वंयज्ञस्त्वंवषट्कारआ
पोज्योतीरसोमृतमितिप्राणायामानंतरमाचमनविधानादायतासुपक्षेशंखोक्तवचनमुप
संहर्त्तव्यमितिकेचित् एतच्चाचमनंमार्जनानंतरंश्रुतमपिऋष्यंतरोक्ताघमर्षणानंतरमनु
ष्ठेयं॥शंखेनाप्येतदनंतरंसूर्यांजलिदानाभिधानादुपस्थानात्प्राक्॥छंदोगपरिशिष्टे॥ उ
त्थायार्कंप्रतिप्रोहेत्त्रिकेणांजलिमंभसः॥प्रोहेत्क्षिपेत् त्रिकेण॥ प्रणवोभूर्भुवःस्वश्चगाय
त्रीचतृतीयकाइत्यनेनैवप्रागुक्तेन॥अंजलिमित्येकत्वस्यविवक्षितत्वादंजलित्रयदानमशु
द्धं॥कात्यायनश्च॥ पुष्पाण्यंबुमिश्राण्यूर्ध्वंक्षिप्त्वोर्ध्वबाहुः सूर्यमुदीक्षेत उद्वयंतमउदुत्यं
चित्रंतच्चक्षुरितिगायत्र्याचयथाशक्तिजपरूपमुपस्थानं॥अत्रमध्याह्नसंध्यांजलौसजलपु
ष्पश्रवणात्॥विष्णुपुराणादौतोयमात्रश्रवणमुपलक्षणं॥प्रातःसायंविषयंवा तथाचैतैत्ति
रीयश्रुतिः॥ब्रह्मवादिनः सूर्याभिमुखाःसंध्यायांगात्र्यभिमंत्रिताअपऊर्ध्वमुत्क्षिपंति ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एताआपोवज्रभूतास्तानिरक्षांसि मंदेहारुणद्वीपे प्राक्षिपंति यत्प्रदक्षिणंप्रक्रामंतितेन
पाप्मानमवधुन्वंति उद्यंतमस्तंयांतमादित्यमभिध्यायन्ब्राह्मणोविद्वान्सकलंभद्रमश्नुते
इति ॥ तथाचोर्ध्वबाहुविधानात्॥तदसंसक्तपार्ष्णिर्वाएकपादर्धपादपि ॥कुर्यात्कृतांजलि
र्वापिऊर्ध्वबाहुरथापिवा इति छंदोगपरिशिष्टीयमुपस्थानेकृतांजलित्वं सायंप्रातर्विषय
मेव ॥ उदीक्षेतेतिसूर्याभिमुखत्वेतात्पर्यं ॥तेनमेघादिच्छन्नेपिसंमुखमुपतिष्ठेदुपस्थायेत्यु
पसंहारात्तुगायत्र्याचजपितयैवोपस्थानंऽमंत्रकरणकंहिदेवताज्ञानमुपस्थानं ॥ तच्चजपे
पिसंभवति॥अनर्थपरएवोच्चारणेजपपदमितिप्रायिकम् ॥ अन्यत्रार्थपरत्वेप्रमाणाभा
वात् ॥ अतएवयथाशक्तीतिनानाजपसंख्यासंभवात् ॥ युक्तंचैतत् पृथक्कात्यायनेनज
पानभिधानादृष्यंतरसंवादाच्चेति ॥ याज्ञवल्क्यः॥ स्नानमब्दैवतैर्मंत्रैर्मार्जनंप्राणसं
यमः ॥ सूर्यस्यचाप्युपस्थानंगायत्र्याः प्रत्यहंजपइति मार्जनप्राणसंयमयोःपाठक्रमोन
ग्राह्यः॥प्राणायामादेःसंध्याप्रयोगोपलक्षणार्थत्वात्॥ एवंकात्यायनेनापिप्राणायामानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तरमुपस्थानाभिधानंसंक्षेपात्॥गायत्रीजपेयोगियाज्ञवल्क्यः ॥प्रणवोभूर्भुवःस्वश्चस्वां
गानिहृदयादितः॥त्रिरावर्त्यततःपश्चादार्षंछंदश्चदैवतं॥ विनियोगस्तथारूपंध्यातव्यंक्र
मशस्तुवै॥रूपमाह॥श्वेतवर्णासमुद्दिष्टाकौशेयवसनातथा ॥ श्वेतैर्विलेपनैःपुष्पैरलंकारै
श्चभूषिता॥ आदित्यमंडलस्थाचब्रह्मलोकगताथवा ॥ अक्षसूत्रधरादेवीपद्मासनगता
शुभा॥ आवाह्ययजुषानेनतेजोऽसीतिविधानतः॥ तत्रावाह्यजपित्वाचनमस्कृत्यविसर्ज
येत्॥गायत्रीमधिकृत्यशतपथश्रुतिः॥तस्याउपस्थानं॥गायःयस्येकपदीद्विपदीत्रिपदीच
तुष्पद्यपदसिनहिपद्यसेनमस्तेतुरीयायदर्शतायपदायपरोरजसेसावदोमाप्रायदिति
यंद्विष्मादसावस्मैकामोमासमर्द्धतिवामहैवास्मैसकामःसमृद्ध्यते यस्माएषमुपतिष्ठते ॥
उपस्थानं चैतज्जपात्प्राक्॥ तथाच बौधायनः॥ उपतिष्ठेद्वाएतांदेवींतुरीयेणपदेन ॥ अ
थाप्युदाहरंति ॥ गायत्र्यस्येकपदीद्विपदीत्रिपदीचतुष्पद्यपदसिनहिपद्यसे नमस्तेतुरी
यायदर्शतायपदायपरोरजसेइत्यथैनांजपतीति अथापीत्यादिनातुरीयपदस्वरूपकथनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंश्रुतावपिपरोरजसइत्यंतोमंत्रः अग्रेचार्थवादः॥इदंचबौधायनवाक्यंराजाद्यलिखित
मपिबहुजनसंमतत्वाल्लिखितं॥जप्यमाहयोगियाज्ञवल्क्यः॥ॐकारः पूर्वमुच्चार्य्योभूर्भुवः
स्वस्ततःपरं॥गायत्रीप्रणवश्चांतेजप्येह्येवमुदाहृतम् ॥ एवंगायत्र्यादौद्वितीयोंकारोच्चार
णमंतिमोंकारत्यागश्चायुक्तः ॥मन्वादावप्यंते ॐकारांतर्भावात्॥यमः सहस्रपरमांदेवीं
शतमध्यांदशावरां॥गायत्रींप्रजपेन्नित्यंसर्वकल्मषनाशिनीं॥अत्रबौधायनः॥शतकृत्वोऽप
रिमितकृत्वोवादशावरामिति ॥ अपरिमितकृत्वोदशोपरिशतादर्वागनियतसंख्यमित्यर्थः
गोभिलः ॥ कदाचिदपिनोविद्वान्गायत्रीमुदकेजपेत् ॥ गायत्र्यग्निमुखीयस्मात्तस्मादु
त्थायतांजपेत् ॥ बृहस्पतिः ॥ मार्जनंजलमध्येतुप्राणायामोयतस्ततः ॥ उपस्थानंततःप
श्चात्सावित्रीजपउच्यते ॥ मार्जनंमंत्रस्नानांगभूतमपेक्षितं ॥ यतस्ततोजलेस्थलेच॥एवं
चप्राणायामस्यसंध्यांतर्गतस्यजलेस्थलेचविधानादुपस्थानपर्यंतासंध्याजलेप्यस्यमते
गायत्रीजपस्तुस्थलएवोक्तः॥ कात्यायनेनोत्तीर्यप्राणायामादिकमुक्तम्॥ नरसिंहपुराणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नानोत्तरतर्पणात्प्रागुक्तं ॥ दर्भेषुदर्भपाणिः सन्प्राङ्मुखःसुसमाहितः॥ प्राणायामास्तु
कुर्वीतयथाशास्त्रमतंद्रितः ॥ जपेदहरहःस्नात्वासावित्रींजपविद्द्विजः ॥अथपुष्पांजलिंक्षि
प्त्वाभानवेचोर्ध्वबाहुकः ॥ उद्वुत्यंचजपेन्मंत्रंचित्रंतच्चक्षुरित्यपि ॥ प्रदक्षिणमुपावृत्यनम
स्कृत्यततः प्रभुमिति॥ अत्रदर्भेष्वितिश्रवणात्स्थलएवसंध्याकरणमुक्तम् ॥ जपानंतरमु
पस्थानंप्रकारांतरमेतत्॥ बौधायनेऽपिदर्शनात् ॥ हारीतःप्रणवव्याहृतिसावित्रींजपन्पा
पेभ्योमुच्यते॥शतंजप्त्वामानसात्पूतोभवति॥सहस्रंजप्त्वावाक्कायकृतात्पूतोभवति॥ यमः
नतथावेदजप्येनपापंनिर्दहतिद्विजः ॥ यथासावित्रीजप्येनसर्वपापैःप्रमुच्यते ॥ अथज
पविधिः ॥तत्रशंखः॥ कुशवृष्यामासीनःकुशोत्तरायांवा कुशपवित्रपाणिरुदङ्मुखः सूर्या
भिमुखोऽक्षमालामादायदेवतांध्यायन्जपंकुर्यात् सुवर्णमणिमुक्ताफलस्फाटिकपद्माक्षै
द्राक्षरुद्राक्षपुत्रजीवकानामन्यतमानामक्षमालांकुर्वीत ॥कुशग्रंथिकृतांवाहस्तोपयामैर्वा
गणयेत् ॥देवतांध्यायन्निति देवताध्यानस्यजपांगताविधानाद्यत्रनदेवताविशेषविधिस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रापिमन्त्रप्रकाश्यादेवताध्येया ॥ हस्तोपयामोंऽगुलीनमनम् ॥ देशमाह ॥ याज्ञव
ल्क्यः ॥ गृहेलेकगुणंजप्यंनद्यांतुत्रिगुणंस्मृतम् ॥ गवांगोष्ठेशतगुणमग्न्यागारेशताधि
कम् ॥ सिद्धिक्षेत्रेषुतीर्थेषुदेवतायाश्चसन्निधौ ॥ सहस्रंशतकोटीनामनन्तंशिवसन्निधौ ॥
॥ तथा ॥ तिष्ठंश्चोद्वीक्ष्यमाणोऽर्कंजपंकुर्यात्समाहितः ॥ अन्यथाप्राङ्मुखःकुर्याद्वक्ष्यमा
णक्रमेणतु ॥ प्राक्कूलेषुकुशेष्वेवचासीनश्चासनेशुभे ॥ नात्युच्छ्रितेनातिनीचेदर्भपाणिः
सुसंयतः ॥ स्फाटिकेन्द्राक्षरुद्राक्षपुत्रजीवसमुद्भवैः ॥ अक्षमालाहिकर्त्तव्याप्रशस्ताह्युत्तरोत्तरा ॥ प्राक्कूलेषुप्रागग्रेषु ॥ दीर्घकालीनफलार्थजपेभक्ष्यमाह ॥ शाकयावकभैक्षा
णिपयोमूलफलानिच ॥ दधिसर्पिस्तथाह्यापः प्रशस्तंह्युत्तरोत्तरम् ॥ चरवोह्युपवासश्च
भैक्षंनक्तमयाचितम् ॥ विशश्वृङ्गाटशालूकहविष्यान्नानियानितु ॥ एतान्यनुव्रतान्याहुः
शस्तानिजपकर्मणि ॥ पुनर्भैक्षोपादानंप्रशंसार्थम् ॥ अत्रशाकादीनांविकल्पात् भक्ष्य
विशेषेणजपारम्भेएकादश्युपवासोऽपिनकर्त्तव्यइतिहरिहरः ॥ एतान्यनुव्रतानीत्युपसं

Nepal Sanskrit University, Belmoeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हारादितरव्यावृत्तौतात्पर्यम् ॥ एषांतुविकल्पःसमुच्चयोवेतिनास्था ॥ जप्यमाहमनुः ॥
वेदमेवजपेन्नित्यंयथाकालमतंन्द्रितः ॥ तंह्यस्याहुःपरंधर्ममुपधर्मोऽन्यउच्यते ॥ वेदमेवे
त्यावश्यकाभिप्रायम्फलाधिक्यार्थंवा परमोधर्मइत्युपसंहारात् ॥ अतोनपौराणिकादि
मन्त्रजपेनिषेधः ॥ याज्ञवल्क्यः ॥ यज्ञानान्तपसाञ्चैवशुभानाञ्चैवकर्मणाम् ॥ वेदएव
द्विजातीनांनिःश्रेयसकरःपरः ॥ विष्णुः ॥ स्नातश्चपवित्राणियथाशक्तिजपेत् ॥ विशेषतः
सावित्रीम्पुरुषसूक्तंवा ॥ नैताभ्यामधिकमस्ति ॥ शङ्खः ॥ नाघमर्षणात्परमन्तर्जले न
व्याहृतिभ्यः परं होमे न सावित्र्याः परं जप्ये ॥ मनुयमशंखवसिष्ठहारीतयोगियाज्ञव
ल्क्याः ॥ जप्येनैवतुसंसिद्ध्येद्ब्राह्मणोनात्रसंशयः ॥ कुर्यादन्यन्नवाकुर्यान्मैत्रोब्राह्मणउ
च्यते ॥ आङ्गिराः ॥ प्रणवाद्यास्तथावेदाः प्रणवेप्रत्यवस्थिताः ॥ वाङ्मयः प्रणवः सर्वम
भ्यस्येत्प्रणवन्ततः ॥ नरसिंहपुराणे ॥ त्रिविधोजपजज्ञःस्यात्तस्यभेदंनिबोधत ॥ वाचि
कश्चउपांशुश्चमानसश्चत्रिधास्मृतः ॥ त्रयाणांजपयज्ञानांश्रेयान्स्यादुत्तरोत्तरः ॥ यदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः ॥ मन्त्रमुच्चारयेद्व्यक्तंजपयज्ञःसवाचिकः ॥ शनैरुच्चार
येन्मन्त्रमीषदोष्ठौप्रचालयन् ॥ किंचिच्छब्दंस्वयंविद्यादुपांशुःसजपःस्मृतः ॥ ध्येयाय
दक्षरश्रेण्योवर्णाद्वर्णंपदात्पदम् ॥ शब्दार्थचिंतनाभ्यासःसउक्तोमानसोजपः ॥ एवञ्च
त्रिविधस्यापिजपस्यविधानात् ॥ नोच्चैर्जप्यम्बुधःकुर्यात्सावित्र्याश्चविशेषतः॥इतिशं
खोक्तमल्पफलाभिप्रायम् ॥ ध्यायेतमनसामन्त्रान् जिह्वोष्ठौनविचालयेत् ॥ नकम्पये
च्छिरोग्रीवां दन्तान्नैवप्रकाशयेत् ॥ इतियोगियाज्ञवल्क्योक्तम्मानसजपविषयम् ॥
॥ योगियाज्ञवल्क्यः ॥ नचंक्रमन्नचहसन्नपार्श्वमवलोकयन् ॥ नापाश्रितोनजल्पंश्च
नप्रावृतशिरास्तथा ॥ नपदापदमाक्रम्यनचैवहितथाकरौ ॥ नचासमाहितमनानचसं
श्रावयञ्जपेत् ॥ नच्छिन्नवासाःस्थलगोजपादीनाचरेद्बुधः ॥ व्रतादृतेनार्द्रवासानैकवासाः
समाचरेत् ॥ नजीर्णेननमलिनेननपरिच्छिष्टेनवाजपेत् ॥ यक्षराक्षसभूतानिसिद्धविद्या
धरोरगाः ॥ हरन्तिप्रसभंयस्मात्तस्माद्धुतंसमाचरेत् ॥ जपकालेनभाषेतव्रतहोमादिकेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च ॥ एतेष्वेवावसक्तंतुयद्यागच्छेद्द्विजोत्तमः॥ अभिवाद्यततोविप्रंयोगक्षेमञ्चकीर्त्तयेत् ॥
तूष्णीमासीतपाखण्डचाण्डालपतितादिकान् ॥ दृष्ट्वातान्वार्य्युपस्पृश्याभाष्यस्नात्वापुन
र्जपेत् ॥ नचैवहितथाकरौ पदाक्रम्येतिशेषः ॥एतेष्वेवावसक्तंजप्यादिषुप्रवृत्तम्॥तथा॥
यदिवाग्यमलोपःस्याज्जपादिषुकथञ्चन ॥ व्याहरेद्वैष्णवंमन्त्रंस्मरेद्वाविष्णुमव्ययम् ॥
॥ बौधायनः॥ कषायवासाःकुरुतेजपहोमप्रतिग्रहान् ॥ नतद्देवागमंभवति हव्यंकव्यम
थोहविः ॥ व्यासः॥ आर्द्रवासाश्चयःकुर्य्याज्जपंहोमंप्रतिग्रहम् ॥ सर्वन्तद्राक्षसंविद्या
द्बहिर्जानुचयत्कृतम् ॥ वसिष्ठः॥ जपहोमोपवासेषुधौतवस्त्रधरोभवेत् ॥ अलंकृतः शु
चिर्मौनीश्राद्धादौविजितेंन्द्रियः॥ लघुहारीतः॥जपेहोमेतथादानेस्वाध्यायेपितृतर्पणे॥
अशून्यन्तुकरंकुर्य्यात्सुवर्णरजतैःकुशैः॥ तथा॥ चितौदर्भाःपथिदर्भायेदर्भायज्ञभूमिषु॥
स्तरणासनपिण्डेषुतान्कुशान्परिवर्जयेत् ॥ पिण्डार्थंयेस्तृतादर्भायैःकृतंपितृतर्पणम् ॥
मूत्रोच्छिष्टैर्धृतायेचतेषांत्यागोविधीयते॥ नीवीमध्येचयेदर्भाब्रह्मसूत्रेचयेधृताः ॥ पवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्योतिषिजुहोमिस्वाहा ॥ इतिप्रातराचामेत् ॥ ॐआपः पुनंत्वितिविष्णुर्ऋषिरनुष्टुप्छं
दआपोदेवताअपामुपस्पर्शनेविनियोगः॥ॐआपःपुनंतुपृथिवींपृथ्वीपूतापुनातुमां॥पुनं
तुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां ॥ यदुच्छिष्टमभोज्यंचयद्वादुश्चरितंमम ॥ सर्वंपुनंतुमा
मापोऽसतांचप्रतिग्रहꣳस्वाहा ॥ इतिमध्याह्नआचामेत् ॥ ॐअग्निश्चमेतिरुद्रऋषिःप्रकृ
तिश्छंदोग्निर्देवताअपामुपस्पर्शनेविनियोगः ॥ ॐअग्निश्चमामन्युश्चमन्युपतयश्चमन्यु
कृतेभ्यःपापेभ्योरक्षंतांयदह्नापापमकार्षंमनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्ना ॥ अ
हस्तदवलुंपतुयकिंचिद्दुरितंमयि॥ इदमहम्माममृतयोनौसत्येज्योतिषिजुहोमिस्वाहा॥
इत्यनेनसायमाचामेत् ॥ ततःॐआपोहिष्ठेत्यादितृचस्यसप्तभिः पदैःशिरसि अष्टमेन
भूमौ नवमेनापिशिरसि कुशत्रयेणजलंक्षिपेत्॥इदमेवमार्जनम् ॥ आपोहिष्ठेत्यादितृ
चस्यसिंधुद्वीपऋषिर्गायत्रीछंदआपोदेवतामार्जनेविनियोगः ॥ ॐ आपोहिष्ठामयोभुव
स्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीरिवमातरः ॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ॥आपोजनयथाचनः ॥ततःकरेण
जलमादायवारत्रयंद्रुपदांपठित्वातज्जलंशिरसिक्षिपेत् ॥ द्रुपदादिवेतिकोकिलोराजपुत्र
ऋषिरनुष्टुप्छंदआपोदेवतासौत्रामण्यवभृथेविनियोगः ॥ ॐ द्रुपदादिवमुमुचानःस्वि
न्नःस्नातोमलादिव ॥ पूतंपवित्रेणेवाज्यमापःशुन्धंतुमैनसइति ॥ ततःकरस्थंजलंनासा
यांसंयोज्यआयतासुरनायतासुर्वात्रिःसकृद्वाऽघमर्षणंजपेत् ॥ अघमर्षणसूक्तस्याघमर्ष
णऋषिरनुष्टुप्छंदोभाववृतोदेवताअश्वमेधावभृथेविनियोगः ॥ ॐऋतंचसत्यंचाभीद्धा
त्तपसोऽध्यजायत ॥ ततोरात्र्यजायततःसमुद्रोअर्णवः ॥ समुद्रादर्णवादधिसंवत्सरोअ
जायत ॥ अहोरात्राणिविदधद्विश्वस्यमिषतोवशी ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्प
यत् ॥ दिवंचपृथिवींचान्तरिक्षमथोस्वः ॥ ततःअन्तश्चरसीतितिरश्चीनऋषिरनुष्टुप्छंन्द
आपोदेवताआचमनेविनियोगः ॥ ॐअन्तश्चरसिभूतेषुगुहायांविश्वतोमुखः ॥ त्वंयज्ञ
स्त्वंवषट्कारआपोज्योतीरसोमृतमित्यनेनाचामेत् ॥ ततउत्थाय ॐ भूर्भुवःस्वरितिगाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्र्याचपुष्पमिश्रंजलंसूर्याभिमुखंप्राक्षिपेत् ॥ ततो भूम्यलग्नगुल्फतलभागोवा भूमिलग्ना
र्द्धचरणोवा भूमिलग्नैकचरणोवा प्रातःसायंच कृताञ्जलिर्मध्याह्नेऊर्ध्वबाहुःसूर्यंध्यायन्नुप
तिष्ठेत् एभिर्मंत्रैः ॥ उद्वयंतमित्यस्याहिरण्यस्तूपऋषिरनुष्टुप्छन्दः सूर्योदेवता सूर्योप
स्थानेविनियोगः ॥ ॐ उद्वयंतमसस्परिस्वः पश्यंतउत्तरम् ॥देवंदेवत्रासूर्यमगन्मज्योति
रुत्तमम् ॥ १ ॥ उदुत्यमित्यस्यप्रस्कण्वऋषिर्गायत्रीछन्दःसूर्योदेवतासूर्योपस्थानेविनि
योगः ॥ ॐउदुत्यंजातवेदसंदेवंवहंतिकेतवः ॥ दृशेविश्वायसूर्यं ॥ २ ॥ चित्रमित्यस्यकौ
त्सऋषिस्त्रिष्टुप्छंदः सूर्योदेवतासूर्योपस्थानेविनियोगः ॥ ॐ चित्रंदेवानामुदगादनीकं
चक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअन्तरिक्षꣳ सूर्यआत्माजगतस्तस्थुषश्च
॥ ३ ॥ तच्चक्षुरितिदध्यङ्ङाथर्वणऋषिरक्षरातीतपुरउष्णिक्छन्दःसूर्योदेवता सूर्योपस्था
नेविनियोगः ॥ ॐतच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदः शतंजीवेमशरदः
शतꣳशृणुयामशरदः शतम्प्रब्रवामशरदःशतमदीनाः स्यामशरदः शतम्भूयश्चरदःशता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त् ॥ ततः ॥ ॐ हृदयायनमः ॐभूः शिरसेस्वाहा ॐभुवः शिखायैवषट् ॐस्वः कवचाय
हुं ॐभूर्भुवः स्वः नेत्राभ्यांवौषट् ॐभूर्भुवःस्वः अस्त्रायफट् इत्यंगानित्रिरावर्त्यपूर्वोक्त
मृष्यादिकंस्मृत्वापूर्वोक्तरूपांगायत्रींध्यात्वा ॥ तेजोऽसीतिदेवाऋषयः शुक्रंदैवतं गायत्री
छंदो गायत्र्यावाहनेविनियोगः ॥ ॐ तेजोऽसिशुक्रमस्यमृतमसिधामनामासि प्रियं
देवानामनाधृष्टंदेवयजनमसीति गायत्रीमावाह्य ॥ ॐ गायत्र्यस्येकपदीद्विपदीत्रिपदी
चतुष्पद्यपदसिनहिपद्यसेनमस्तेतुरीयायदर्शतायपदायपरोरजसेसावदोमित्युपस्था
य ॥ प्रातःप्राङ्मुखोमध्याह्नेसूर्याभिमुखस्तिष्ठन् सायंपश्चिमाभिमुखउपविष्टउक्तविधि
नागायत्रींजपेत् ॥ जप्यस्वरूपंयथा ॥ ॐ भूर्भुवःस्वः ॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीम
हि ॥ धियोयोनःप्रचोदयात् ॥ ॐ ततः प्रणिपत्यविसर्जयेत्॥अथब्रह्मयज्ञः ॥ तत्रकात्या
यनः ॥ विभ्राडित्यनुवाकपुरुषसूक्तशिवसंकल्पमंडलब्राह्मणैरित्युपस्थाय प्रदक्षिणीकृ
त्य नमस्कृत्योपविशेद्दर्भेषु दर्भपाणिः स्वाध्यायंचयथाशक्त्यादावारभ्यवेदं विभ्राडि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यादिनाऽऽदित्योपस्थानंकाम्यं मध्याह्नेचोदयेचैवविभ्राडादीच्छयाजपेदितिछंदोगपरि
शिष्टदर्शनात् ॥ स्वाध्यायंकुर्यादितिशेषः॥ यथाशक्तीत्यादिनास्वाध्यायलक्षणंवेदंपठेदि
तिशेषः ॥ तत्रापस्तम्बः॥यथाध्यायमुत्सृजन्वाचामनसाचाऽनध्यायेयथाध्यायमुत्सृजन्
यद्यदधीतंतत्तदपरित्यजन् ॥ वाचामनसाचेत्युभयत्रअधीयीतेतिशेषः ॥ एवंचानध्याये
मनसाध्ययनविधानान्नैत्यिकेनास्त्यनध्यायोब्रह्मसूत्रंहितत्स्मृतमितिमनूक्तंमानसविष
यमेव ॥ छंदोगपरिशिष्टे॥यश्चश्रुतिजपः प्रोक्तोब्रह्मयज्ञःसउच्यते ॥ सचार्वाक्तर्पणात्का
र्यःपश्चाद्वाप्रातराहुतेः ॥ वैश्वदेवावसानेवानान्यत्रर्त्तेनिमित्तकात्॥ऋतेनिमित्तकात् जल
स्थतर्पणादिनिमित्तंविना ॥ याज्ञवल्क्यः ॥ वेदाथर्वपुराणानिसेतिहासानिशक्तितः ॥ ज
पयज्ञार्थसिद्ध्यर्थंविद्यांचाध्यात्मिकींजपेत् ॥ अत्रेयंव्यवस्था ॥ समस्तवेदाध्यायिनाऽऽ
दावारभ्यवेदपाठेनस्वाध्यायःकरणीयः ॥ एकदेशाध्यायिनापुरुषसूक्तादिपवित्रपाठेन
॥ सावित्रीमात्राध्यायिनाप्रणवादिपाठेनेति ॥ अथतर्प्पणम् ॥ तत्रशातातपः ॥ तर्प्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णंतुशुचिःकुर्यात्प्रत्यहंस्नातकोद्विजः ॥ देवेभ्यश्चऋषिभ्यश्चपितृभ्यश्चयथाक्रमम् ॥ प्रत्यहमितिवचनान्नित्याधिकारः ॥ तदुक्तंछंदोगपरिशिष्टे ॥ तस्मात्सदैवकर्त्तव्यमकुर्वन्महतैनसा ॥ युज्यतेब्राह्मणः कुर्वन्विश्वमेतद्बिभर्त्तिहि ॥ विष्णुपुराणे ॥ शुचिवस्त्रधरः स्नातोदेवर्षिपितृतर्पणं ॥ तेषामेवहितीर्थेनकुर्वीतसुसमाहितः ॥ तेषांदेवर्षिपितृणामृषितीर्थमंगुल्यग्रमात्रमितिबौधायनप्रोक्तम् ॥ विष्णुः ॥ स्नातश्चार्द्रवासादेवर्षितर्पणमंभःस्थएवकुर्यात् परिवर्त्तितवासाश्चेत्तीर्थमवतीर्य्य ॥ अंभःस्थएवेति छंदोगपक्षे ॥ कात्यायनादिभिरुत्तीर्य्येत्यनंतरंविधानात् ॥ स्थलाशौचपक्षेवा ॥ यदाहयोगियाज्ञवल्क्यः ॥ यत्राऽशुचि स्थलं वा स्यादुदके देवताः पितॄन् ॥ तर्पयेत्तु यथाकाममप्सु सर्वं प्रतिष्ठितम् ॥ फलार्थमपिजलेतर्पणमाहकार्ष्ण्याजिनिः ॥ आपोदेवगणाःसर्वेआपःपितृगणाःस्मृताः ॥ तस्माज्जलेजलंदेयंपितृणांदत्तमक्षयम् ॥ तथा ॥ देवतानांपितृणांचजलेदद्याज्जलांजलिं ॥ असंस्कृतप्रमीतानांस्थलेदद्याज्जलांजलिम् ॥ एवंचजलतर्पणपक्षेपि असंस्कृतप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मीतानांस्थलएवजलदानं ॥ अत्रचजलतर्पणपक्षेउपस्थानपर्यंतासंध्याजलेकरणीया त
तस्तर्पणमात्रं ततउत्तीर्यगायत्रीजपोब्रह्मयज्ञश्च ॥ तर्पणानंतरमपिब्रह्मयज्ञस्यनरसिंह
पुराणादौदर्शनात् ॥ वैश्वदेवावसाने वा सोऽस्तु ॥हारीतः॥ देवाश्चपितरश्चैवकांक्षंतिस
रितंप्रति ॥ अदत्तेतुनिराशास्तेप्रतियांतियथागतं ॥ अदत्तेउदकइतिशेषः ॥ पितृगाथा
सुयमः ॥ अपिनःसकुलेजायाद्योनोदद्याज्जलांजलीन् ॥ नदीषुबहुतोयासुशीतलासुवि
शेषतः ॥ शंखलिखितौ ॥ वापीतडागोदपानेषुसप्तपंचत्रीन्वापिंडानुद्धृत्यदेवपितॄंस्तर्पये
त् ॥ अयंवाप्यादौयथासंख्यंसप्तपिंडाद्युद्धारोऽसामर्थ्यादिनास्नानाभावेऽपिकर्त्तव्यःत
र्प्पणांगत्वात् ॥ स्नानपक्षेऽपिस्नानस्यपूर्वप्रवृत्तत्वात्स्नानांगतर्प्पणेनैवप्रसंगात् स्वतं
त्रतर्प्पणाधिकारःसिद्धः ॥ अतोनपृथक्पिंडोद्धारएकप्रयोगत्वात् ॥ तदाहयोगियाज्ञव
ल्क्यः ॥ उपस्थानादियस्तासांमंत्रवान्कीर्त्तितोविधिः ॥ निवेदनान्तंतत्स्नानमित्याहु
र्ब्रह्मवादिनः ॥ उपस्थानमुरुहीत्यादिमंत्रैः ॥ तासामपांनिवेदनं देवागातुविदइति मं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रेणवक्ष्यमाणम् ॥ एवंचमध्याह्नसंध्यायाःस्वतंत्रायाअपि स्नानप्रयोगांतर्भावः ॥ अत
एव लोकैः स्नानसंध्याकर्मणोर्नैरंतर्य्येणानुष्ठानं ॥ योगियाज्ञवल्क्यः ॥ आवाह्यपूर्ववत्
मंत्रैरास्तीर्य्यचकुशान्शुचीन् ॥ प्रागग्रेषुसुरान्सम्यग्दक्षिणाग्रेषुवैपितॄन् ॥ पूर्ववत्त
र्पयेदितिसंबंधः ॥ तेनपितृतर्प्पणे ॐ कारस्तृप्यतामितिचलक्ष्यते मंत्रैरुदीरतामवरइ
त्यादिभिः ॥ कल्पतरुकारस्तुपूर्ववन्मंत्रैर्याज्ञवल्क्यपूर्वसंहितायाः श्राद्धावाहनमंत्रैरा
वाह्येतिसंबंधमाह तदयुक्तम् ॥ योगिशास्त्रंचयत्प्रोक्तमितिसंहितांतराभिधानात् ॥ योगि
याज्ञवल्क्यसंहितैवपूर्वा ॥ यतः ॥ स्नानमब्दैवतैर्मंत्रैर्यत्त्वयोक्तंपुरानघेतिचग्रंथांतरमाह
अत्रापिपूर्वाध्यायेऽभिधानात् ॥ किंच ॥ विश्वेदेवासइत्यृचाउशन्तस्त्वेत्यृचेतिमंत्रद्वयस्यै
वावाहनविनियोगान्मंत्रैरितिबहुत्वंदुर्लभम् ॥ विश्वेदेवासइत्यादिमंत्रस्यब्रह्मादिप्रका
शनसामर्थ्यमपिनास्तीत्युक्तैवव्याख्या ॥ तथाकार्ष्णाजिनिरावाहनमंत्रमाह ॥ नाभि
मात्रेजलेस्थित्वाचिन्तयेदूर्ध्वमानसः ॥ आगच्छन्तुमेपितरइमंगृह्णंत्वपोंजलिम् ॥ एवंचदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वावाहनमपिदेवाआगच्छंत्वितिकर्त्तव्यम् ॥ पित्रावाहनएवात्रमंत्रदर्शनादावाह्येत्यपित
त्परमेव ॥ यमः ॥ भूमौयदापोदीयंतेदाताचैवजलेस्थितः ॥ वृथातद्दीयतेतोयंनोपतिष्ठ
तिकस्यचित् ॥ एतेनजलस्थोजलएवतर्पणजलंप्रक्षिपेदित्युक्तम् ॥ स्थलस्थेनस्थलए
वत्यक्तव्यमित्याह ॥ शंखः ॥ नोदकेषुनपात्रेषुनक्रुद्धोनैकपाणिना ॥ नोपतिष्ठतितत्तोयंय
न्नभूमौप्रदीयते ॥ बौधायनमतेस्थलस्थेनापितर्पणजलंजलएवप्रक्षेप्तव्यम् ॥ वासःप
रिधानानन्तरमप्सुतर्प्पणविधानात् ॥ हरिहरस्तुजलसमीपस्थेनतर्प्पणजलंजलएवप्र
क्षेप्तव्यं ॥ यदाचोद्धृतजलेनतर्पणंतदैवस्थलेतर्पणजलप्रक्षेपः ॥ तद्विषयमेवप्रागग्रेषुसुरा
नित्याहतदयुक्तं ॥ उदकेनोदकंकुर्यात्पितृभ्यश्चकदाचन ॥ उत्तीर्य्यचशुचौदेशेकुर्य्यादुद
कतर्पणमितिशंखेनजलस्थतर्पणंनिवार्य्यशुचौदेशेतर्पणमितिविधायनोदकेष्वितिपुनरु
दकनिषेधस्तीरस्थस्यापिजलप्रक्षेपेकृतइतितन्मतेस्थलस्थेनसर्वत्रस्थलएवतर्पणजलंप्र
क्षेप्तव्यमिति॥बौधायनमतेस्थलस्थेनजलेजलस्थेनजलेप्रक्षेपइतिविकल्पएव॥सुमंतुः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकाशेतुक्षिपेद्वारिजलस्थोदक्षिणामुखः ॥ आकाशेजलोपर्य्येव ॥ योगियाज्ञवल्क्यः॥
यद्युद्धृतंप्रसिञ्चेद्वैतिलान्संमिश्रयेज्जले ॥ अतोऽन्यथातुसव्येनतिलाग्राह्याविचक्षणैः ॥
अस्यायमर्थः ॥ यद्युद्धृतोदकमादायतर्पणंकरोतितदाजलेतिलाःप्रक्षेप्तव्याः ॥ यदातुज
लाशयस्थोजलमादायतदावामहस्तेनतिलग्रहणम् ॥मरीचिः॥ तिलानामप्यभावेतुसुव
र्णरजतान्वितम् ॥ तदभावेनिषिंचेत्तुदर्भैर्मंत्रेणवापुनः ॥ अत्रपूर्वपूर्वाभावेउत्तरोत्तरविधि
रितिभ्रमोवाक्यांतरविरोधात्त्यक्तव्यः ॥ किंतुतिलादीनांसमुदितानामप्यभावेएकदेशो
पादानप्रदर्शनमिदम् ॥एवंच॥ विनारूप्यसुवर्णेनविनाताम्रतिलैः खगैः॥विनादर्भैश्चमं
त्रैश्चपितृणांनोपतिष्ठतीतिशंखवचनं रूप्यादीनांसर्वेषामभावे नत्वेकदेशाभावेऽपि॥ सौ
वर्णेनतुपात्रेणराजतौदुंबरेणवाखड्गपात्रेणवाशंकुनापिउदकंपितृतीर्थेस्पृशन्दद्यादिति
शंखोक्तंसतिसंभवे ॥ शंकुः कीलकः ॥ सतुसुवर्णादिनिर्मितः प्रकृतत्वात् ॥ मध्योर्द्ध्वांगुलि
त्रयःकरः शंकुरितिकेचित् ॥ त्रींस्त्रीञ्जलांजलीन्दद्यादुच्चैरुच्चतरन्ततः ॥ गोशृङ्गमात्रमुद्धृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यजलमध्येजलंक्षिपेत् ॥ अस्यार्थः ॥ पित्रादिषट्कांजलित्रयेउत्तरोत्तरवृद्धिःकर्त्तव्या ॥ गोशृङ्गमात्रमितितृतीयांजल्युच्चैस्त्वनिर्देशः ॥ जलमध्यइतिपक्षेजलप्राप्तानुवादः ॥ योगियाज्ञवल्क्यः ॥ दक्षिणेपितृतीर्थेनजलंसिंचेद्यथाविधि ॥ दक्षिणेनैवगृण्हीयात्पितृतीर्थसमीपतः ॥ दक्षिणकरइतिशेषः ॥ मरीचिः ॥ मुक्तहस्तेनदातव्यं मुद्रान्तत्रनदर्शयेत् ॥ मुद्रातर्जन्यंगुष्ठयोगेन पितृतीर्थावरोधः॥शंखलिखितौ॥नेष्टकाचितेदेवपितॄंस्तर्पयेत्॥उशनाः॥नवेष्टिताशिरानकृष्णकाषायवासादेवपितृकार्यंकुर्यात् ॥ योगियाज्ञवल्क्यः॥ सवर्णेभ्योजलन्देयमसवर्णेकदाचन ॥ मित्रत्वादिप्रसक्तजलदाननिषेधोयम्प्रकरणादिति ॥ नैतद्बलाद्भीष्मतर्पणनिषेधोयादितत्रप्रमाणमस्ति॥पारस्करः॥ब्राह्मणेननकर्त्तव्यंशूद्रस्यैवौर्ध्वदैहिकं ॥ शूद्रेणवाब्राह्मणस्यविनापारशवात्क्वचित् ॥ ऊर्ध्वदैहिकमितिसामान्यपरिग्रहाच्छ्राद्धादिपरिग्रहोपि ॥ पारशवोब्राह्मणाच्छूद्रायामुत्पन्नः तेनस्वपितुःकर्त्तव्यमित्यर्थः ॥ कात्यायनः ॥ ब्राह्मणन्तर्पयेत्पूर्वंविष्णुंरुद्रंप्रजापतिं देवांश्छन्दांसिवेदानृषी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्पुराणाचार्यान्गन्धर्वानितराचार्यान्संवत्सरंसावयवंदेवीरप्सरसोदेवानुरगान्नागान्सा
गरान्पर्वतान्सरितोमनुष्यान्यक्षान्रक्षांसि पिशाचान्सुपर्णान्भूतानिपशून्वनस्पतीनो
षधीर्भूतग्रामं चतुर्विधम् ॥ तृप्यतामित्योंकारपूर्वम् ॥ ततो निवीती मनुष्यान् ॥ सनकं
चसन्दनञ्चतृतीयञ्चसनातनम् ॥ कपिलञ्चासुरिञ्चैववोढुंपंचशिखन्तथा॥ ततोऽपसव्यं
तिलमिश्रंकव्यवाडंनलंसोमंयममर्यमणमग्निष्वात्तान्सोमपान्बर्हिषदोयमांश्चैके ॥ य
मायधर्मराजायमृत्यवेचान्तकायच ॥ वैवस्वतायकालायसर्वभूतक्षयायच॥ औदुम्बराय
दध्नायनीलायपरमेष्ठिने॥ वृकोदरायचित्रायचित्रगुप्तायवैनमः॥ एकैकस्यतिलैर्मिश्रांस्त्रीं
स्त्रीन्दद्याज्जलांजलीन् ॥ यावज्जीवकृतंपापंतत्क्षणादेवनश्यति॥ जीवत्पितृकोप्येतानन्यां
श्चेतरः॥ उदीरतामङ्गिरस आयन्तुन ऊर्जं पितृभ्यो येचेह मधुवाता इतितृचं जपन्प्रासि
श्चेत्तृप्यध्वमितित्रिर्नमोवइत्युक्त्वा मातामहाचार्य्यगुरुशिष्यर्त्विग्ज्ञातिबांधवानतर्पितादे
हाद्रुधिरंपिबंति ॥ पाठक्रमादेवपूर्वताप्राप्तौपूर्वमितिक्रमाभिधानात्प्रत्येकंब्रह्मादीनांतर्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णत्वम् ॥ एवञ्चतृप्यतामित्योंकारपूर्वमितिचप्रत्येकमभिसम्बध्यते ॥ तदुक्तंयोगियाज्ञव
ल्क्येन ॥ अन्वारब्धेनसव्येनपाणिनादक्षिणेनतु ॥ तृप्यतामितिसेक्तव्यं नाम्नातुप्रण
वादिना ॥ अनारब्धेनपश्चाल्लग्नेन ॥ एवञ्चदेवतर्पणे ॐ ब्रह्मातृप्यतामित्यादिरूपम्
॥ बहुवचनान्तश्रुतदेवतासम्बन्धेनवार्थाद्बहुवचनम् ॥ पुराणानितरानित्याचार्यविशेष
णम् ॥ सावयवइतिसंवत्सरविशेषणम् ॥ साकांक्षत्वात् ॥ चतुर्विधइतिभूतग्रामविशेषण
म् ॥ ततोनिवीत्यभिधात् पूर्वमुत्सर्गसिद्धमुपवीतित्वमेव ॥ उक्तञ्चयोगियाज्ञवल्क्येन ॥
ब्रह्मादीनुपवीतीतुदेवतीर्थेनतर्पयेत् ॥ निवीतीकायतीर्थेनमनुष्यान्सनकादिकान् ॥
मनुष्यतर्पणमपि ॐ सनकस्तृप्यतामित्योंकारपूर्वमेव ॥ तृप्यतामितिसेक्तव्यमितिवा
क्यस्यतदुत्तरत्वात् ॥ ततोऽपसव्यमिति पितृधर्मोपलक्षणमेतत्॥तेनातऊर्ध्वंदक्षिणामुख
त्वमपि कव्यवाडादौदिव्यपितृतर्पणेस्वधानम इत्यादियोज्यम् ॥ नमस्कारस्वधान्विता
नितियाज्ञवल्क्यवचनात् ॥ पितृतर्पणेस्वधानमइतिहरिहरमते ॥ कव्यवाडनलइत्येका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवतेतिकल्पतरुकारः ॥ तत्तुकव्यवाडादयइतिगोभिलाभिधानादयुक्तम् ॥ अतएवकाम
धेन्वादौकव्यवाडंनलमितिपाठः ॥ यमांश्चैकइतिमतान्तरेणाभिधानादनावश्यकत्वम् ॥
अतएवैकैकस्येत्यादिनापापक्षयरूपफलाभिधानम् ॥ नमइतिसर्वत्रचतुर्थ्यंतसंबंधः ॥
एतान्यमान् तेनयमतर्पणपर्यंतंजीवत्पितृकेणापिकर्त्तव्यं ॥ अन्यांश्चेतरःप्रमीतपितृकः
॥ अन्यान्स्वपित्रादीनपितर्पयेदित्यर्थः ॥ जीवत्पितृकस्यापिपितामहादितर्पणंपितृपा
तित्यपक्षे ॥ येभ्योवापिपितादद्यात्तेभ्योवापिप्रदापयेदितियाज्ञवल्क्यवचनात् ॥ अत्र
पित्रादितर्पणेअंजलित्रयंयमतर्पणप्रकृतत्वात् ॥ एवञ्चदिव्यपितृतर्पणेप्यंजलित्रयंतद्ध
र्मकत्वात् ॥ एकैकस्येतितत्रापिसम्बधात् ॥ ब्रह्मादितर्पणेमनुष्यतर्पणेचानुवृत्तौप्रमाण
भावादेकएवांजलिः ॥ केचिद्विष्णुपुराणकल्पे ॥ त्रिरपःप्रीणनार्थायदेवानामपवर्जयेदि
तिदर्शनात् देवतर्पणेऽप्यंजलित्रयमेवेत्याहुस्तदयुक्तम् ॥ पितृनमातामहानितिप्रतिपुरु
षमभ्यसेदितिच्छन्दोगपरिशिष्टेषट्पुरुषमात्रेआवृत्तिदर्शनात् ॥ एवञ्चस्त्रीतर्पणपक्षेप्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कएवाञ्जलिः ॥ त्रींस्त्रीन्जलाञ्जलीनितियमोक्तंषट्पुरुषमात्रगोचरमितिबोद्धव्यम् ॥ त
थाचएकैकमंजलिंदेवाद्वौद्वौतुसनकादयः ॥ अर्हंतिपितरस्त्रींस्त्रीन्स्त्रियोप्येकैकमंजलिं ॥
एवंचउदीरतामवरइत्यादिमन्त्रनवकस्यापित्रादित्रिकांजलिनवकेसम्बंधः ॥ जपन्मंत्रा
न्यथाक्रमामितियोगियाज्ञवल्क्यवचनात् ॥ प्रत्येकमंजलीनांदेयत्वान्मंत्राणामपि प्रत्ये
कंप्रकाशनसामर्थ्यात् सर्वत्रचसर्वान्वये आवृत्तिर्विकल्पोवास्यात् ॥ एवञ्चैकैकमन्त्रपा
ठानन्तरमेकैकांजलिदानम्मन्त्रान्तेकर्मादिसन्निपातनियमात् ॥ अतएवजपन्नितिवर्त्त
मानसामीप्यान्नतुमन्त्रपाठकालेएवजलसेकः गोत्राद्युच्चारणाभावप्रसङ्गात् ॥ नचमं
त्रात्प्राग्वाक्यमित्यपियुक्तम् ॥ त्यागार्थकत्वात् ॥ यदाहुर्वाक्यमात्रेणतर्पणमादौ उदीर
तामित्यादिमन्त्रैस्तुसेकमात्रम् ॥ पाठकालएवस्तोत्रमन्त्रवद्दृष्टार्थामिति ॥ तन्न ॥ कर्मा
न्तरकल्पनापत्तेः ॥ मन्त्रैश्चदेयमुदकमितिविरोधाच्च ॥ तृप्यध्वमितित्रिरितिपित्रादित्रयं
मिलितमुद्दिश्यतृप्यध्वमित्यनेनवारत्रयमुदकन्देयमित्यर्थः ॥ नतुपाठमात्रमेतत् ॥ अद्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टार्थतापत्तेः ॥ प्रसिंचेदित्यन्वयाच्च ॥ मातामहादित्रिकेतुनमोवइत्युक्त्वेत्यभिधानादेकवा
रमेवमन्त्रमुच्चार्यतर्पणम् ॥ प्रसिंचेदितिश्रवणाज्जलसेकमात्रंतर्पणमपिकुर्वन्ति ॥ नपितृ
नुद्दिश्यत्यागइतिभ्रमोहेयः ॥ नामगोत्रस्वधाकारैस्तर्प्याः स्युरनुपूर्वशइतियोगियाज्ञव
ल्क्येनत्यागस्यैवावगमात् ॥ एवञ्चदेवतर्पणेपित्यागएवतुल्यतयानिर्देशात् ॥ कात्यायना
नुक्तमपिदेवतर्पणमनुष्यतर्पणयोर्मध्येऋष्यन्तरोक्तमरीच्यादितर्पणमपिकुर्वंति ॥ युक्त
ञ्चैतत् ॥ देवर्षिपितृतर्पणमितिप्रागुक्तत्वात् ॥ अतएवयोगियाज्ञवल्क्यकल्पात्स्मृतिमहा
र्णवलिखितम्मरीच्यादितर्पणं ॥ पद्मपुराणाद्धरिहरेणोक्तं ॥ कामधेनौ योगियाज्ञवल्क्य
वचनमेवालिखितं ॥ तथा ॥ षट्पुरुषतर्पणानन्तरंतेषांस्त्रियस्तर्प्यास्त्रीन्पितृतस्त्रीन्मातृतः
पत्न्यश्चापितृतर्पणमिति गोभिलवचनात् ॥ बौधायनेनापिपितृतर्पणानन्तरंमातृतर्पणं
ततोमातामहतर्पणन्ततोमातामह्यादितर्पणमुक्तम् ॥ शंखः ॥ स्नातःकृतजपोंतर्जानुरुद
ङ्मुखश्चदिव्येनतीर्थेनदेवानुदकेनतर्पयेत् ॥ अथकृतापसव्योदक्षिणामुखोंतर्जानुः पि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्र्येणतीर्थेनपितृभ्योयथाश्राद्धंयथाप्रकाशमुदकन्दद्यात् ॥ पित्रेपितामहायप्रपितामहाय
मात्रेपितामह्यैप्रपितामह्यैआसप्तमात्पुरुषात्पितृपक्षेयावतांनामजानीयात् ॥ पितृपक्षा
णामुदकतर्पणंकृत्वागुरूणांकुर्यात् ॥ मातृपक्षाणांकृत्वासम्बधिबान्धवानांकुर्यात् ॥ तेषां
कृत्वासुहृदांकुर्यात् ॥ अंतर्जानुर्मध्यकृतकरः उदङ्मुखश्चेतिचकारात्प्राङ्मुखतापि ॥ म
नुशातातपयोगियाज्ञवल्क्याः ॥ यदेषतर्पयत्यद्भिःपितॄन्स्नात्वाद्विजोत्तमः॥ तेनैवसर्वमा
प्नोतिपितृयज्ञक्रियाफलं ॥ पद्मपुराणे ॥ ब्रह्माणंतर्पयेत्पूर्वंविष्णुंरुद्रंप्रजापतिं ॥ देवाय
क्षास्तथानागागंधर्वाप्सरसोऽसुराः ॥ क्रूराःसर्पाःसुपर्णाश्चतरवोजृंभकाःखगाः ॥ वि
द्याधराजलाधारास्तथैवाकाशगामिनः ॥ निराधाराश्चयेजीवाःपापेऽधर्मेरताश्चये॥ तेषा
माप्यायनायैतद्दीयतेसलिलंमया ॥ कृतोपवीतीदेवेभ्योनिवीतीतुभवेत्ततः ॥ मनुष्यांस्त
र्पयेद्भक्त्याऋषिपुत्रानृषींस्ततः ॥ सनकश्चसनंदनश्चतृतीयश्चसनातनः ॥ कपिलश्चासु
रिश्चैववोढुःपंचशिखस्तथा ॥ सर्वेतेतृप्तिमायांतुमद्दत्तेनांबुनासदा ॥ मरीचिमत्र्यंगिरसौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुलस्त्यंपुलहंक्रतुं ॥ प्रचेतसंवसिष्ठंचभृगुंनारदमेवच ॥ देवान्ब्रह्मऋषीन्सर्वांस्तर्पयेद
क्षतोदकैः ॥ अपसव्यंततः कृत्वासव्यंजानुचभूतले ॥ अग्निष्वात्तांस्तथासौम्यान्हविष्मंत
स्तथोष्मपान् ॥ सुकालिनोबर्हिषदस्तथाचैवाज्यपान्पुनः ॥ तर्पयेच्चपितॄन्भक्त्यासति
लोदकचंदनैः ॥ दर्भपाणिस्तुविधिनाप्रेतान्स्वाँस्तर्पयेत्ततः ॥ पित्रादीन्नामगोत्रेणतथामा
तामहानपि ॥ संतर्प्यभक्त्याविधिवदिमंश्लोकमुदीरयन् ॥ येबांधवाबांधवायेऽन्यज
न्मनिबांधवाः ॥ तेतृप्तिमाखिलांयांतुयश्चास्मत्तोभिवांछति ॥ अत्रहरिहरः ॥ देवादीनां
ॐ देवास्तृप्यंतामित्यादिवाक्येनतर्पणं ॥ तेषामाप्यायनायैतदितितद्ध्यानमात्रंतदयु
क्तं ॥ श्रुतवाक्यंविहायवाक्यांतरकल्पनायाश्चायुक्तत्वात् ॥ तस्माद्यत्रब्रह्माणमित्या
दौवाक्यंनश्रुतंतत्रैवयोगियाज्ञवल्क्यवाक्याद्युक्तवाक्यपरिग्रहः ॥ निवीतीचभवेत्तत
इतिश्रवणाद्दृषितर्पणेनिवीतित्वभ्रमोहेयः ॥ निवीतस्यमनुष्यधर्मतयातत्रतत्राभिधाना
त् ॥ केचित्तुअथनिवीतीऋषींस्तर्पयामीतिबौधायनदर्शनान्मरीच्यादितर्पणेनिवीतित्वमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाहुः ॥ अक्षतोदकैरित्यत्राक्षतपदंयवपरं ॥ यवाद्भिस्तर्पयेद्देवानितिपरिशिष्टदर्शनात् ॥
अत्रब्रह्मादिचतुष्टयं ॐ कारादिनातृप्यतामित्यंतेननाम्नादेवादीन्देवायक्षाइत्यादिना
दीयतेसलिलंमयेत्यंतेनउपवीती ॥ ततोनिवीतीसनकादीन्सनकश्चेत्यादिनासदेत्यंतेन
ततउपवीतीमरीच्यादीन्दशऋषीन् ॥ ॐ मरीचिस्तृप्यतामित्यादिनामांतेनएतान्सर्वा
न्यवमिश्रितजलैः ॥ ततःप्राचीनावीतीअग्निष्वात्तादीन् सप्तदिव्यपितृगणान् ॐ अ
ग्निष्वात्तास्तृप्यंतामिदंतिलोदकंतेभ्यः स्वधानमइतिरूपेण ॥ ॐ अद्यामुकगोत्रः पि
ताअमुकशर्मातृप्यतामिदंजलंसतिलंतस्मैस्वधा इत्यादिवाक्यैःषट्पुरुषान् ॥ ॐ अद्या
मुकगोत्रामाताअमुकदेवीतृप्यतामिदंजलंतस्यैस्वधा इत्यादिवाक्यैस्तेषांस्त्रियस्तर्पयि
त्वायेबांधवाइत्यादिश्लोकेनावसानांजलिंदद्यादितिप्रयोगः॥अथकातीयतर्पणप्रयोगः॥
ॐ ब्रह्मातृप्यतां ॐ विष्णुस्तृप्यतां ॐ रुद्रस्तृप्यतां ॐ प्रजापतिस्तृप्यतां ॐ देवास्तृ
प्यंताम् ॐ छंदांसितृप्यंताम् ॐ वेदास्तृप्यंताम् ॐ ऋषयस्तृप्यंतां ॐ पुराणाचार्यास्तृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्यंता ॐ गंधर्वास्तृप्यंतां ॐ इतराचार्यास्तृप्यंतां ॐ संवत्सरःसावयवस्तृप्यताम् ॐ दे
व्यस्तृप्यंतां ॐ अप्सरसस्तृप्यंताम् ॐ देवानुगास्तृप्यंताम् ॐ नागास्तृप्यंतां ॐ साग
रास्तृप्यंतां ॐ पर्वतास्तृप्यंतां ॐ सरितस्तृप्यंतां ॐ मनुष्यास्तृप्यंतां ॐ यक्षास्तृप्यंतां
ॐ रक्षांसितृप्यंतां ॐ पिशाचास्तृप्यंतां ॐ सुपर्णास्तृप्यंतां ॐ भूतानितृप्यंतां ॐ पशव
स्तृप्यंताम् ॐ वनस्पतयस्तृप्यंताम् ॐ ओषधयस्तृप्यंताम् ॐ भूतग्रामश्चतुर्विधस्तृप्य
तां इत्युपवीतीप्राङ्मुखउदङ्मुखोवादेवतीर्थवर्त्तिनायवोदकेनोदकेनैववातर्पयेत् ॥ तत
ॐ मरीचिस्तृप्यताम् ॐ अत्रिस्तृप्यताम् ॐ अंगिरास्तृप्यताम् ॐ पुलस्त्यस्तृप्य
तां ॐ पुलहस्तृप्यताम् ॐ क्रतुस्तृप्यताम् ॐ प्रचेतास्तृप्यताम् ॐ वसिष्ठस्तृप्यताम्
ॐ भृगुस्तृप्यताम् ॐ नारदस्तृप्यताम् इतिऋषीन्देववत् ततः ॐ सनकस्तृप्यताम् ॐ
सनंदनस्तृप्यतां ॐ सनातनस्तृप्यतां ॐ कपिलस्तृप्यतां ॐ आसुरिस्तृप्यताम् ॐ वोढु
स्तृप्यतां ॐ पंचशिखस्तृप्यतामितिमनुष्यान्निवीतीकायतीर्थेनेतिविशेषः॥ ततोपसव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ कव्यवाडस्तृप्यतामिदंतिलोदकंतस्मैस्वधानमः ॐ नलस्तृप्यतामिदंतिलोदकंतस्मै
स्वधानमः ॐ सोमस्तृप्यतामिदंतिलोदकंतस्मैस्वधानमः ॐ यमस्तृप्यतामिदंतिलोदकं
तस्मैस्वधानमः ॐ अर्यमातृप्यतामिदंतिलोदकंतस्मैस्वधानमः ॐ अग्निष्वात्तास्तृप्यंता
मिदंतिलोदकंतेभ्यःस्वधानमः ॐ सोमपास्तृप्यंतामिदंतिलोदकंतेभ्यःस्वधानमः ॐ ब
र्हिषदस्तृप्यंतामिदंतिलोदकंतेभ्यःस्वधानमः इतिदिव्यपितॄन्प्राचीनावीतीदक्षिणामुखः
पातितवामजानुःसतिलजलांजलित्रयेणपितृतीर्थेनतर्पयेत् ततः ॐ यमायनमः ॐ धर्म
राजायनमः ॐ मृत्यवेनमः ॐ अंतकायनमः ॐ वैवस्वतायनमः ॐ कालायनमः ॐ
सर्वभूतक्षयायनमः ॐ उदुंबरायनमः ॐ दध्नायनमः ॐ नीलायनमः ॐ परमेष्ठिनेन
मः ॐ वृकोदरायनमः ॐ चित्रायनमः ॐ चित्रगुप्तायनमः इतिचतुर्दशयमान्प्रत्येकं
सतिलांजलित्रयेणतर्पयेत् ॐ आगच्छंतुमेपितरइमंगृण्हंत्वपोंजलिमितिपितॄनावाह्य
ॐ उदीरतामवरउत्परासउन्मध्यमाः पितरःसोम्यासः ॥ असुंयईयुरवृकाऋतज्ञास्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नोवंतुपितरोहवेषु ॐ अद्यामुकगोत्रः पितामुकशर्मातृप्यतामिदंजलंसतिलंतस्मैस्वधे
तिमंत्रेणवाक्येनचप्रथममंजलिंपित्रेदद्यात् ॐ अंगिरसोनः पितरोनवग्वाअथर्वाणोभृ
गवःसोम्यासः॥ तेषांवयꣳसुमतौयज्ञियानामपिभद्रेसौमनसेस्यामइतिमंत्रेणवाक्येनच
द्वितीयांजलिंदद्यात् ॐ आयंतुनः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः॥ अ
स्मिन्यज्ञेस्वधयामदंतोधिब्रुवंतुतेवंत्वस्मानितिमंत्रेणवाक्येनचतृतीयांजलिंपित्रेदद्यात्
ॐ ऊर्जंवहंतीरमृतंघृतंपयःकीलालंपरिस्रुतं॥स्वधास्थतर्पयतमेपितॄन् ॐ अद्यामुकगो
त्रः पितामहोऽमुकशर्मातृप्यतामिदंजलंसतिलंतस्मैस्वधाइतिपितामहायप्रथमांजलिंद
द्यात् ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यःस्वधायिभ्यः स्वधानमः प्रपिता
महेभ्यः स्वधायिभ्यः स्वधानमः अक्षन्पितरोमीमदंतपितरोतीतृपंतपितरः पितरःशुं
धध्वमितिमंत्रेणवाक्येनचद्वितीयांजलिम् ॐ येचेहपितरोयेचनेहयांश्चविद्मयाꣳउचन
प्रविद्म॥ त्वंवेत्थयतितेजातवेदःस्वधाभिर्यज्ञꣳसुकृतंजुषस्व इतिमंत्रेणवाक्येनचतृतीयां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जलिम् ॐ मधुवाताऋतायतेमधुक्षरंतिसिंधवः॥माध्वीर्नःसंत्वोषधीः ॐ अद्यामुकगोत्रः
प्रपितामहोऽमुकशर्मातृप्यतामिदंजलंसतिलं तस्मैस्वधाइतिमंत्रेणवाक्येनचप्रपिताम
हायप्रथमांजलिंदद्यात् ॐ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः॥मधुद्यौरस्तुनः पिता
इतिमंत्रेणवाक्येनचद्वितीयांजलिं ॐ मधुमान्नोवनस्पतिर्मधुमाँअस्तुसूर्यः ॥ माध्वीर्गा
वोभवंतुनइतिमंत्रेणवाक्येनचतृतीयांजलिंप्रपितामहायदद्यात् ततः ॐ तृप्यध्वंतृप्यध्वं
तृप्यध्वमितिपित्रादिभ्योंऽजलित्रयंदद्यात् ॐ नमोवः पितरोरसायनमोवः पितरः शो
षायनमोवः पितरोजीवायनमोवः पितरः स्वधायैनमोवः पितरोघोरायनमोवः पितरो
मन्यवेनमोवः पितरः पितरोनमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्मैतद्वः पितरो
वासइतिमंत्रंपठित्वा ॐ अद्यामुकगोत्रोमातामहोऽमुकशर्मातृप्यतामिदंजलं सतिलं त
स्मै स्वधा इति मातामहायांजलित्रयं दद्यात् ॥ एवं प्रमातामहायवृद्धप्रमातामहाय
च॥ ततः ॐ अद्य अमुकगोत्रा माता अमुकदेवी तृप्यतामिदं जलं सतिलं तस्यै स्वधे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिमातरम् ॥ एवमेव पितामहीप्रपितामहीमातामहीप्रमातामहीवृद्धप्रमातामहीस्तर्पये
त् ॥ ततः ॥ आचार्यादीन्नामगोत्रस्वधाकारैस्तर्पयेत् ॥ विष्णुपुराणे ॥ इदं चापि जपेदम्बु
ददात्मेच्छयानृप ॥ उपकारायभूतानांकृतदेवादितर्पणः ॥ देवासुरास्तथायक्षानागाग
न्धर्वराक्षसाः॥ पिशाचागुह्यकाः सिद्धाः कूष्माण्डास्तरवःखगाः ॥ जलेचराभूनिलयावा
य्वाधाराश्चजन्तवः ॥ प्रीतिमेतेप्रयान्त्वाशुमद्दत्तेनांबुनाखिलाः ॥ ॐ नरकेषुसमस्तेषुया
तनासुचयेस्थिताः ॥ तेषामाप्यायनायैतद्दीयतेसलिलंमया ॥ ॐ येबान्धवाबान्धवावा
येऽन्यजन्मनिबान्धवाः ॥ तेतृप्तिमखिलांयांतुयश्चास्मत्तोऽभिवाञ्छति ॥ इदं च काम्यत
र्पणमेभिरेवश्लोकैर्देवविधिनाकर्त्तव्यम् ॥ अत्रवसिष्ठः ॥ स्नानशाट्यांतुदातव्यामृदस्ति
स्रोविशुद्धये इति ॥ पराशरः ॥ जलमध्येतु यः कश्चिद्द्विजातिर्ज्ञानदुर्बलः ॥ निष्पीडय
तितद्वस्त्रंस्नानंतस्यवृथाभवेत् ॥ योगियाज्ञवल्क्यः ॥ अन्नप्रकरवत्तस्याअपसव्येनपीड
नम् ॥ पीडयित्वाततः पश्चाज्जपंकुर्यात्सुविस्तरम् ॥ अन्नप्रकरवत्श्राद्धोच्छिष्टसमीपान्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकिरवत् ॥ तेनदक्षिणामुखत्वादि असंस्कृतप्रमीततोद्देश्यत्वंच॥तथाचगोभिलीयोमंत्रः
येकेचास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः॥ तेतृप्यंतुमयादत्तंवस्त्रनिष्पीडनोदकमिति॥
पीडयित्वेत्यादिनादर्शितोजपश्छंदोगब्राह्मणे कात्यायनादिभिरनभिधानात् गोभिलसं
वादाच्च॥ हरिहरस्तुवाजसनेयिनांजपारुपरमेवैतदनुष्ठानेनैवाजपीपूयशोणितमित्यस्या
पिसिद्धिमाह अथतर्पणोत्तरकार्यं तत्रविष्णुपुराणे॥आचम्यचततोदद्यात्सूर्यायसलिलांज
लिं॥नमोविवस्वतेब्रह्मन्भास्वतेविष्णुतेजसे॥जगत्सवित्रेशुचयेनमस्तेकर्मदायिने ॥का
त्यायनः॥निष्पीड्यवस्त्रमाचम्यब्राह्मवैष्णवरौद्रसावित्रमैत्रवारुणैस्तल्लिंगैरर्चयेत् ॐअ
दृश्रमस्यहꣳसइत्युपस्थायप्रदक्षिणीकृत्यनमस्कृत्यदिशश्चदेवताश्च ब्रह्माग्निपृथिव्यौष
धिवाग्वाचस्पतिविष्णुमहद्भ्योऽपांपतयेवरुणायनमः इतिसर्वत्रसंवर्चसेतिमुखंविमृशेद्दे
वागातुविदइतिविसर्जयेदेष स्नानविधिः ॥तल्लिंगैर्ब्रह्मादिप्रकाशकैरर्चयेदितिब्रह्मादीनि
तिशेषः ॥ एषाचपूजापुष्पैरेव ॥ तथाचयोगियाज्ञवल्क्यः॥ध्यात्वाप्रणवपूर्वंतुदैवतंसुसमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितः ॥ नमस्कारेणपुष्पाणिविन्यसेत्तुपृथक्पृथक् ॥ कात्यायनेनाप्यादौसुमनसआहृत्ये
तिसूर्यांजलिदानार्थमेतत्पूजार्थंचपुष्पोपादानमुक्तं ॥ आवाहनमित्यादिविष्णुपूजाप्रका
रांतरंयोगियाज्ञवल्क्यमते ॥ एवंसावित्रैर्मंत्रैर्वारुणैरितिसावित्रादिमंत्रबहुत्वंतन्मतएव
कात्यायनेनब्रह्मादीनांसमासेनोक्तत्वात् ॥ एकैकपरत्वेपिबहुत्वोपपत्तेः ॥ दिशश्चेतिचकारा
न्नमस्कृत्येतिपूर्वत्रापिसंबध्यते ॥ देवतादिशमेवाऽत्रकेचित् ॥ श्रुतदिगादिशब्दमनादृत्य
प्राच्यादिपदेनदिङ्नमस्कारमिंद्रादिपदेनदिग्देवतानमस्कारंकुर्वंति ॥ ब्रह्माग्नीत्यादौस
मासनिर्दिष्टेऽपिपृथङ्नमस्कार्यत्वंनमइतिसर्वत्राप्युपसंहारात् ॥ विष्णुमहद्भ्यइतितुमि
लितस्यैवनमस्कार्य्यत्वम् ॥ अद्भ्यइतिपृथगुपादानात् ॥ एषस्नानविधिरित्युपसंहारः ॥ ए
तत्पर्यंतंस्नानप्रयोगानुवृत्तेर्ज्ञापनार्थमेतत्विस्तरस्तु विप्रपंचितं ॥ अथपूजादिप्रकारः ॥ ॐ ब्रह्म
जज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचोव्वेन आवः ॥ सबुध्न्याउपमाअस्यविष्ठाः सतश्चयो
निमसतश्चव्विवः ॥ ॐ ब्रह्मणेनमः ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ꣳसुरे ॐ विष्णवेनमः ॐ नमस्तेरुद्रमन्यवउतोतइषवेनमः॥बाहुभ्यामुततेनमः ॐ रुद्रा
यनमः ॐआकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतंमर्त्यंच॥हिरण्ययेनसवितारथेनादेवो
यातिभुवनानिपश्यन् ॐ सवित्रेनमः ॐ मित्रस्यचर्षिणीधृतोवोदेवस्यसानासि द्युम्नंचि
त्रश्रवस्तमं ॐ मित्रायनमः ॐ इमंमेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॐ
वरुणायनमः इतिब्रह्मादीन्त्संपूज्योत्थाय ॐ अदृश्रमस्यकेतवोविरश्मयोजनाꣳअनु ॥
भ्राजन्तोअग्नयोयथा ॐहꣳसःशुचिषद्वसुरंतरिक्षसद्धोताव्वेदिषदतिथिर्दुरोणसत्॥नृष
द्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहदित्याभ्यांसूर्यमुपस्थायप्रदक्षिणी
कृत्य ॐआदित्यायनमः इत्यादित्यंनमस्कृत्य ॐदिग्भ्योनमः ॐ दिग्देवताभ्योनमः ॐ
ब्रह्मणेनमः ॐ अग्नयेनमः ॐपृथिव्यैनमः ॐ ओषधिभ्योनमः ॐ वाचेनमः ॐवाचस्प
तयेनमः विष्णवेनमः महद्भ्योनमः अद्भ्योनमः अपांपतयेनमःवरुणायनमइतिनमस्कृत्य
ॐ संवर्चसापयसासंतनूभिरगन्महिमनसासꣳशिवेन॥त्वष्टासुदत्रोव्विदधातुरायोनुमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्ष्टुतन्वोपद्विलिष्टं इतिजपन्सजलकरद्वयेनमुखंसंस्पृश्य ॐ देवागातुविदोगातुंवित्वागा
तुमितमनसस्पतइमंदेवायज्ञ ँ स्वाहाव्वातेधाःइतिविसर्जयेत् ॥ अथ योगियाज्ञवल्क्यः
प्रक्षाल्यतीरदेशंतुगत्वास्वंधर्ममाचरेत् ॥ गत्वागृहमितिशेषः ॥ तथासंस्त्रवादिष्वथाचम्यसो
पानत्कोह्यसंस्पृशन् ॥ आगतःसोदपात्रस्तुयत्नेनशुचिरेवसः ॥ तेनोदकेनद्रव्याणिप्रो
क्ष्याचम्यतथागृहे ॥ ततःकर्माणिकुर्वीतनित्यंवैयानिकानिच ॥ पात्रादिरहितंतोयमुद्धृतंसव्य
पाणिना ॥ नतेनप्रोक्षणंकुर्याद्वस्त्रनिष्पीडनेनच ॥ सौवर्णराजतंताम्रंमुख्यंपात्रंप्रकीर्त्तितं
तदभावेस्मृतंपात्रंस्त्रवतेयन्नधारितम् ॥ शातातपः ॥ बहिर्नद्यादिष्वाचांतःसोदकःकिंचिद
स्पृशन् ॥ रथ्यागतोपियत्नेनशुचिरेवहिमानवः ॥ तथा ॥ नाधोवस्त्रैकदेशेनशुद्ध्यर्थमपआह
रेत् ॥ यद्यानीतंतुसव्येनप्रोक्षयेद्दक्षिणेनतु ॥ ब्रह्मपुराणे ॥ आचम्यविधिवत्सम्यगालिखे
त्पद्ममग्रतः ॥ अक्षताद्भिःसपुष्पाभिःसतिलारुणचंदनैः ॥ अर्घपाद्येप्रयत्नेनसूर्यनामानु
कीर्त्तनैः ॥ नमोस्तुविष्णुरूपायनमस्तेब्रह्मचारिणे ॥ सहस्त्ररश्मयेनित्यंनमस्तेसर्वतेजसे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमस्तेरुद्रवपुषेनमस्तेभक्तवत्सल॥पद्मनाभनमस्तेस्तुकुंडलांगदभूषण॥नमस्तेसर्वलो
केशसुप्तानामपिबुध्यसे॥सुकृतंदुष्कृतंचैवसर्वंपश्यसिसर्वदा॥सर्वदेवनमस्तेस्तुप्रसीदम
मभास्कर॥दिवाकरनमस्तेस्तुप्रभाकरनमोस्तुते॥एवंरविंनमस्कृत्यत्रिःकृत्वाचप्रदक्षिणां
द्विजंगांकांचनंस्पृष्ट्वाततोविष्णुगृहंव्रजेत्॥आश्रयस्थंततःपूज्यप्रतिमांचापिपूजयेत्॥अ
क्षतमत्रतंडुलाः सूर्यार्चांतरेतथादर्शनात्॥अर्घपाद्येदातव्येइतिशेषः॥आश्रयस्थंजलस्थ
म्॥ अथदेवपूजा ॥ तत्रविष्णुपुराणेसूर्यांजलिमुक्त्वा ततोगृहार्चनंकुर्यादभीष्टसुरपूजनम्
जलाभिषेकंपुष्पाणांधूपाद्यैश्चनिवेदनम् ॥ आदिपदेनगंधदीपनैवेद्यग्रहणं ॥ यमः॥ देव
माल्यापनयनंदेवागारसमूहनं ॥ स्नपनंसर्वदेवानांगोप्रदानसमंस्मृतं ॥ब्रह्मपुराणे ॥ दे
वानांप्रतिमायत्रघृताभ्यंगक्षमाभवेत् ॥ पलानितस्यैदेयानिश्रद्धयापंचविंशतिः॥ अष्टोत्त
रंपलशतंस्नानेदेयंचसर्वदा॥द्वेसहस्रेपलानांतुमहास्नानेचसंख्यया ॥ दातव्यंयेनसर्वासु
दिक्षुनिर्यातितद्धृतं ॥ब्रह्मांगलग्नंविप्रेभ्योवैष्णवंचप्रदीयते॥ रुद्रांगलग्नमग्नौचदहेत्सर्वंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्क्षणात् शिष्टेभ्योप्यथदेवेभ्योयत्तुदीनेषुनिक्षिपेत्॥विप्रेभ्यस्त्वत्रतद्देयंब्रह्मणेयन्निवेदि
तम्॥वैष्णवंसात्वतेभ्यश्चभस्मांगेभ्यश्चशांभवं॥ सौरंमगेभ्यःशाकेभ्यस्तापिनेयन्निवेदि
तम्॥ स्त्रीभ्यश्चदेयंमातृभ्योयत्तुकिंचिन्निवेदितं॥ भूतप्रेतपिशाचेभ्योयत्तुदीनेषुनिक्षिपे
त्॥ प्रतिमेत्युपलक्षणं॥ तेनलिंगेपीयमेवाभ्यंगादिद्रव्यसंख्या॥ यद्यपिघृतंप्रकृतंतथा
पिदुग्धादिस्नानेपीयमेवव्यवस्था एतच्चभविष्यत्पुराणोक्तं॥ ब्रह्मांगलग्नमित्यादिनास्ना
नघृतादिप्रतिपत्तिः॥ विप्रेभ्यस्त्वथेत्यादिनादत्तनैवेद्यादिप्रतिपत्तिः सात्वतोब्रात्याद्वैश्या
दीत्यधिकृत्य॥ पंचमःसात्वतोनामविष्णोरायतनानिच॥ पूजयत्याज्ञयाराज्ञोयादिस्या
त्संयतेंद्रियः॥ इतिब्रह्मपुराणएवदर्शितः॥ तापिनेबुद्धाय॥ एतत्तुतिथिकृत्यादौयत्रबुद्धपू
जाविहितातत्परमिदं॥ मातृभ्यइतिदेवीमात्रोपलक्षणम्॥ पूजाधारमाहशातातपः॥
भूमावप्सुतथाग्नौचदिविसूर्येचदेवता॥ तथा॥ अप्सुदेवामनुष्याणांदिविदेवामनीषिणा
म्॥ काष्ठलोष्टेषुमूर्खाणांमुक्तस्यात्मनिदेवताः॥ व्योमसूर्यपूजायालिंगंशिवपूजायां॥ प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिमासर्वदेवानामितिस्थानान्तरोक्तं ॥ देवीपुराणे ॥ शुचिवस्त्रधरःप्राज्ञोमौनीध्यानपरा
यणः ॥ गतकामभयद्वंद्वोरागमात्सर्यवर्जितः ॥ आत्मानंपूजयित्वातुस्त्रग्गंधसितवाससा
॥ सुमुहूर्त्तेयजेद्देवान्स्वकीयासनसंस्थितान् ॥ आहूयचार्घपाद्यादिहेमपात्रेणदापयेत् ॥
रक्तबिल्वाक्षतैः पुष्पैर्दधिदूर्वाकुशैस्तिलैः ॥ सामान्यः सर्वदेवानामर्घोऽयंपरिकीर्त्तितः ॥
अभावाद्दधिदूर्वादेर्मानसंवाप्रकल्पयेत् ॥ सुमूहर्त्तइतिविहितपूर्वाह्णादिकालपरं ॥ रक्तंकुं
कुममितिकल्पतरुकारः॥अक्षतानामतंडुलाः ॥ सूर्यविष्णुशिवदुर्गाणांसामान्यतःपंचोप
चाराः ॥ चंदनागुरुकर्पूरकुंकुमान्यनुलेपने ॥ पुष्पाणि गिरिवनस्ववाटिकासंभवानि सुगं
धीनि स्वयंविकसितानि केशकीटरहितानि ॥अपर्युषितानि स्वयमपतितानि ॥ अखंडा
नि आर्द्राणि च प्रोक्षितानि पत्राण्यपीदृशानि निर्गंधीन्यपीतिविशेषः ॥ धूपेगुग्गुलुः ॥
सघृतः केवलोवाकृष्णागुरुर्वा ॥ दीपेघृतंतैलं नैवेद्येभक्ष्यभोज्यकंदमूलफलान्नपानका
दीनि ॥ फलंपक्वमक्वथितंकृम्यविद्धं ॥ पक्वान्नंवैश्वदेवार्थमग्रमुद्धृत्यदातव्यम् ॥ प्रतिदेवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नानादिविशेषाः पंचोपचारविशेषाश्च जपस्तुतिप्रदक्षिणाप्रणामविसर्जनविशेषाश्च वि
स्तरतयानालिखिताः ॥ इदानींनिषेधाः॥तत्रनरसिंहपुराणेशंतनुंप्रतिनारदवाक्यं॥अतः
प्रभृतिनिर्माल्यंमालंघयमहीपते ॥ नरसिंहस्यदेवस्यअन्येषांचदिवौकसां ॥ भविष्यपु
राणे ॥ यथानलंघयेत्कश्चित्स्नपनंभास्करस्यच॥ तथाकार्यंप्रयत्नेनलंघितंह्यशुभावहं ॥
तामिस्त्रंनरकंकर्त्तालंघयेद्यः सरौरवम् ॥ देवीपुराणे ॥ वस्वंगुलिविहीनंतुनपात्रंकारये
त्क्वचित् ॥ नक्वचिदितिस्नानादौनिषेधः ॥ बौधायनः ॥ परिहितमधिरूढमप्रक्षालितंप्रा
वरणंमललुलितंमनुष्यसंगतंतद्देवतायैनसंयुज्यात् ॥ लघुहारीतः ॥ स्नानंकृत्वातुयेकेचि
त्पुष्पंगृह्णंतिवैद्विजाः ॥ देवतास्तन्नगृह्णंतिभस्मीभवतिदारुवत् ॥ देवीपुराणे ॥ शिवेवि
र्जयेत्कुंदमुन्मत्तंचहरेस्तथा ॥ देवीनामर्कमंदारौसूर्यस्यतगरंतथा ॥ दुर्गायामर्कमंदार
योर्विहितत्वाद्देवीपदंतदितरपरम् ॥ सूर्यस्यात्रतगरप्रतिषेधात् ॥ कुब्जकस्तगरश्चेतिभ
विष्यत्पुराणीयोविधिः केवलविहिताभावे ॥ एवमन्यत्रापिकेवलविहिताभावे विहितनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षेधोपादानम् ॥ भविष्यपुराणे ॥ कृष्णलोन्मत्तकंकांचीतथाचगिरिकर्णिका ॥ नकंबलिदे
कापुष्पंतथान्यद्गंधवर्जितम् ॥ नचाम्रातकजैः पुष्पैरर्चनीयोदिवाकरः ॥ कृष्णलाःपृथिव्यै
तिप्रसिद्धा ॥ कांचीवराही ॥ गिरिकर्णिकाअपराजिता ॥ कंटकारिकाविहिताॐ वाय
जायां॥वामनपुराणे॥सुरभीणितथान्यानिवर्जयित्वातुकेतकीम्॥ केतक्यशोकाः ॐ उदी
नरसिंहपुराणीयोविधिः॥ काम्यपूजायांनरसिंहमूर्त्तौवा ॥ शिवपूजायांभविष्ये सूर्यायन
केतकीचातिमुक्तश्चकुंदोयूथीमदंतिका ॥शिरीषसर्जबंधूककुसुमानिविवर्जयेषसेनमः ॥
पत्रकुसुमंकरंजेंद्रतरूद्भवं ॥ बिभीतकानिधन्वानिकुसुमानिविवर्ज्जयेत् ॥ मुखःपातित
धीनिकुसुमानिविवर्ज्जयेत् ॥ गंधहीनमपिग्राह्यंपवित्रंयत्कुशादिकम्॥अर्क ततोबलिशे
लता ॥ मदंतिकायूथ्यनुकारिपुष्पं ॥ इन्द्रतरुः सिंदुवारः ॥ तथा ॥ नस॥ गृहद्वारादौ
नशुक्लागुरुसंभवम् ॥ दद्यादर्कायधर्मात्माधूपमाराधनोद्यतः ॥ अक्षोटंयक्षमबल्यनन्त
वम् ॥ तथासूर्य्यदीपाधिकारे तांश्चदत्वानहिंसेतनतैलपरिवर्ज्जनात् ॥ तेभ्यःस्वेच्छया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूषकोंधश्चजायते ॥विष्णुः॥ननक्तंगृहीतेनोदकेनदेवकार्यंकुर्यात् ॥ चं
रमृगमदजातीफलवर्ज्जमनुलेपनंनदद्यात् ॥ नवासोनीलंरक्तं ॥ नमा
रूपमलंकरणं ॥ नोग्रगंधपुष्पं ॥ नागंधि नकंटकिजं कंटकिजमपिशुक्लं
त् ॥ नरक्तंदद्यात् रक्तमपिकुंकुमंजलजंदद्यात् ॥ नधूपार्थंजीवजातंनघृ
नदीपार्थे नाभक्ष्यंनैवेद्यार्थे भक्ष्येष्वपिअजामहिषीक्षीरं पंचनखमत्स्यव
प्रयतःसन्शुचिर्भूत्वासर्वमेवनिवेदयेत् ॥ तन्मनाःसुमनाभूत्वारागक्रोधवि
मंजलजंचेतिविहितरक्तपुष्पोपलक्षणं॥ तेनऋष्यंतरोक्तान्यपिशमीकुशपल
वीरपाटलपारिभद्रपुष्पाणिदेयानि ॥ एतेचनिषेधाविष्णुपूजामुपक्रम्याविष्णू
वनिबंधकर्तृभिर्लिखिताः ॥ अत्राहुर्देवकार्यमितिसामान्यवचनात्सर्वविषयत्वं
पदंविष्णुपरं संकोचापत्तेः ॥ प्रकरणादेवविष्णुप्राप्तौवैयर्थ्यापत्तेश्च ॥ तस्मात्पूर्व
वविष्णुपूजाकथनंनरक्तमित्यध्यायांतरंसामान्यविषयमिति ॥ कालिकापुराणे ॥

र्नविशेषाश्च वि
दवाक्यं॥अतः
ां ॥ भविष्यपु
तंह्यशुभावहं॥
नपात्रंकारये
प्रक्षालितंप्रा
त्वातुयेकेचि
॥ शिवेवि
मर्कमंदार
रश्चेतिभ
त्रहितनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्करमग्निंचकेशवंकौशकीमपि ॥ चेतसानर्च्चयन्यातिदेवलोकादधोगतिं ॥ कौशि
॥ भविष्यपुराणे ॥ सदायजन्तियज्ञेनसदादानंददन्तिच ॥ सदाचवायुभक्षास्तेर्
तिभास्करम् ॥ नरसिंहपुराणे ॥ यस्तुपूजयतेनित्यंनरसिंहंसुरेश्वरम् ॥ सस्वर
गीस्यान्नात्रकार्याविचारणा ॥ भविष्यपुराणे ॥ नहिलिङ्गात्परंकिञ्चित्पुण्यम
चित् ॥ इतिविज्ञाययत्नेनपूजनीयःसदाशिवः ॥ तथा ॥ दुर्गार्च्चनरतोनित्यंम
म्भवैः॥ दोषैर्नलिप्यतेवीरपद्मपत्रमिवाम्भसा॥ अत्रच क्रमानभिधानेऽपि
म्यमाचारात् ॥ सूर्यार्घ्यप्राथम्यन्तुविष्णुपुराणपद्मपुराणयोर्व्यक्तमेव ॥न
॥ ब्रह्मयज्ञानन्तरमुक्तम् ॥ ततोर्घम्भानवेदद्यात्तिलपुष्पजलान्वितम् ॥ उ
न्तंहंसः शुचिषद्वचा ॥ जलदेवंनमस्कृत्यततोगृहगतःपुमान् ॥ विधिन
त्रविष्णुंसमर्चयेत् ॥ वैश्वदेवन्ततःकुर्याद्बलिकर्मयथाविधि ॥ अथवैश्वदे
तत्रवाजसनेयिगृह्यम् ॥ वैश्वदेवादन्नादुद्धृत्यपर्युक्ष्यस्वाहाकारैर्जुहुय

म्बलिदे
पृथिव्यै
। ॐ वाय
॥ ॐ उदी
ॐ सूर्यायन
उषसेनमः ॥
मुखःपातित
॥ ततोबलिशे
॥ गृहद्वारादौ
यक्षमबल्यनन्त
भूतेभ्यःस्वेच्छया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जापतयेगृह्येभ्यःकश्यपायानुमतयेइतिभूतगृह्येभ्यःमणिकेत्रीन्पर्जन्यनविशेषाश्च वि
धात्रेविधात्रेचद्वार्ययोः प्रतिदिशंवायवेदिशाञ्च मध्येत्रीन्ब्रह्मणेऽन्तरिक्षवाक्यं॥अतः
श्वेभ्योदेवेभ्योविश्वेभ्योभूतेभ्यस्तेषामुत्तरतः उपसेभूतानांपतयेचापरस्यां ॥ भविष्यपु
नमइतिदक्षिणतः ॥ पात्रंनिर्णिज्योत्तरापरस्यान्दिशिनिनयेद्यक्षमैतत्तेइतिह्यशुभावहं॥
त्यत्रव्यपदेशः ॥ विश्वेदेवताकबलिसम्बंधात् ॥ यद्यपिदेवतान्तरमपिवदनपात्रंकारये
प्येकदेशेनव्यवहारः॥ अतएवहोमेप्यस्मिन्वैश्वदेवपदम् गौतमादिकल्पप्रक्षालितंप्रा
देवसम्बन्धात् ॥ अन्नाद्गृहीत्वेतिशेषः॥ पर्युक्ष्यअग्निमितिशेषौविष्ण्वादिसंवत्वातुयेकेचि
पर्युक्षणस्वाहाकारस्यचहोमसामान्यधर्मतयोक्तस्यापिपुनरुपादानम् ॥ एष॥ शिवेवि
त्रक्वचिद्धोमइत्यत्रग्रन्थेइतरसामान्यधर्मनिषेधार्थम् ॥ ब्रह्मणइत्यादिनाप्रत्येकमंदार
तानिर्देशः॥ अनुमतयइतिइतिकारोहोमसमाप्त्यर्थः॥ त्रीन्बलीनितिशेषः ॥ भूश्चेतिभ
वरणेपर्जन्यायाद्यःपृथिव्यै ॥ इतितैनतत्पदेनैवबलिदानमितिसिद्ध्यति॥ द्वार्यर्यहितनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पायस्वाहा ॥ ॐ अनुमतयेस्वाहा ॥ ततोहुतशेषान्नेनबलिदानम् ॥ तत्रप्रत्येकम्बलिदे
शान्करेणमार्जयित्वाजलेनाभ्युक्ष्य ॥ ॐ पर्जन्यायनमः ॥ ॐ अद्भ्योनमः ॥ ॐ पृथिव्यै
नमः ॥ इत्युदपात्रसन्निधौ ॥ ॐ धात्रेनमः ॥ ॐ विधात्रेनमः ॥ इतिद्वार्ययोः ॥ ॐ वाय
वेनमइतिप्रतिदिशम् ॥ ॐ प्राच्यैनमः ॥ ॐ अवाच्यैनमः ॥ ॐ प्रतीच्यैनमः ॥ ॐ उदी
च्यैनमः ॥ इत्यपिप्रतिदिशम् ॥ ॐ ब्रह्मणेनमः ॥ ॐ अन्तरिक्षायनमः ॥ ॐ सूर्यायन
मः ॥ इतिमध्ये ॥ ॐ विश्वेभ्योदेवेभ्योनमः ॐ विश्वेभ्योभूतेभ्योनमः ॥ ॐ उषसेनमः ॥
ॐ भूतानाम्पतयेनमः ॥ इत्युत्तरोत्तरम् ॥ ततः प्राचीनावीतीदक्षिणाभिमुखःपातित
वामजानुः पितृतीर्थेनदक्षिणस्यांदिशि ॐ पितृभ्यः स्वधानमइतिदद्यात् ॥ ततोबलिशे
षान्नलिप्तपात्रम्प्रक्षाल्ययक्ष्मैतत्तेनिर्णेजनंनमइतिवायव्यान्दिशिदद्यात् ॥ गृहद्वारादौ
बलिदानासम्भवे अग्नेःपश्चिमतश्चतुरस्त्रमण्डले धात्रादिबलिदानम् ॥ यक्ष्मबल्यनन्त
रंविष्णुपुराणे ॥ ततोऽन्यदन्नमादायभूमिभागेशुचौपुनः ॥ दद्यादशेषभूतेभ्यःस्वेच्छया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुसमाहितः ॥ देवामनुष्याःपशवोवयांसिसिद्धाःसयक्षोरगदैत्यसंघाः ॥ प्रेताः पिशाचा
स्तरवःसमस्तायेचान्नमिच्छन्तिमयाप्रदत्तम् ॥ पिपीलिकाःकीटपतङ्गकाद्याबुभुक्षिताः
कर्मनिबन्धबद्धाः ॥ प्रयान्तुतेतृप्तिमिदम्मयान्नंतेभ्योविसृष्टंसुखिनोभवन्तु ॥ येषांनमा
तानपितानबंधुर्नचान्यसिद्धिर्नतथान्नमस्ति ॥ तत्तृप्तयेन्नंभुविदत्तमेतत्तेषान्तुतृप्तिर्मुदिता
भवन्तु ॥ भूतानिसर्वाणितथान्नमेतदहञ्चविष्णुर्नयतोऽन्यदास्ति ॥ तस्मादहम्भूतनिका
यभूतमन्नम्प्रयच्छामिभवायतेषाम् ॥ चतुर्दशोभूतगणोयएषतत्रस्थितायेऽखिलभूतसं
घाः ॥ तृप्त्यर्थमन्नंहिमयाविसृष्टन्तेषामिदन्तेमुदिताभवन्तु ॥ इत्युच्चार्यनरोदद्यादन्नंश्र
द्धासमन्वितः ॥ भुविभूतोपकारायगृहीसर्वाश्रयोयतः ॥ श्वचाण्डालविहङ्गानांभुविदद्या
त्ततोनरः ॥ इदञ्चकाम्यबलिदानंसर्वशाखिसाधारणम्बहुभिरभिधानाच्च ॥ मनुः ॥ शुना
ञ्चपतितानाञ्चश्वपचाम्पापरोगिणाम् ॥ वायसानांकृमीणाञ्चशनकैर्निक्षिपेद्भुवि ॥ व्या
सः ॥ ऐन्द्रवारुणवायव्याःसौम्यावैनैर्ऋतास्तथा ॥ वायसाःप्रतिगृह्णन्तुभूमौपिण्डंमया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्पितम् ॥ श्वानौद्वौश्यावशबलौवैवस्वतकुलोद्भवौ ॥ ताभ्याम्पिण्डंप्रयच्छामिस्यातामेता
वहिंसकौ ॥दत्वानेनविधानेनबलिंपश्चादुपस्पृशेत् ॥ वायसादिभ्योभूमौदत्वाब्राह्मणान्
भोजयेत् ॥ पित्रर्थबलिदानानन्तरम् ॥ वसिष्ठः ॥ श्रोत्रियायाग्रन्दत्वाब्रह्मचारिणेचान
न्तरम्पितृभ्योदद्यात् ॥ एतच्चतस्मिन्कालेश्रोत्रियब्रह्मचारिणोरुपस्थितौ ॥ नोचेत्पूर्ववा
क्याद्बल्यनन्तरमेवश्राद्धम् ॥ अथनित्यश्राद्धम् ॥ भविष्यपुराणे ॥ अहरहःक्रियतेयत्तु
तन्नित्यमितिकीर्त्यते ॥ विश्वेदेवविहीनंतदशक्तावुदकेनतु ॥ विश्वेदेवविहीनंविश्वेदेव
श्राद्धरहितम् ॥ मनुशंखशातातपाः ॥ दद्यादहरहःश्राद्धमन्नाद्येनोदकेनवा ॥ पयोमूलफ
लैर्वापिपितृभ्यःप्रीतिमावहन् ॥ छन्दोगपरिशिष्टे ॥ अप्येकमाशयेद्विप्रंपितृयज्ञार्थसि
द्धये ॥ इति ॥ तथा ॥ अप्युद्धृत्ययथाशक्त्याकिञ्चिदन्नंयथाविधि ॥ पितृभ्योऽथमनुष्ये
भ्योदद्यादहरहर्द्विजः ॥ पितृभ्यइदमित्युक्त्वास्वधाकारञ्चकारयेत् ॥ मनुष्येभ्योब्राह्मणे
भ्यः पितृभ्यइदमित्युक्त्वामिलितदेवताकत्वंनित्यश्राद्धमितिकेचित् ॥ मत्स्यपुराणे॥नित्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावत्प्रवक्ष्यामिअर्घावाहनवर्जितमिति ॥ लघुहारीतः॥नित्यश्राद्धमदैवंस्यादर्घपिण्डवि
वर्जितमिति॥ब्रह्मचर्यादिनिवृत्तिराचारात् ॥अथप्रयोगः॥ अद्यनित्यश्राद्धमहङ्करिष्यइ
तिवाक्यंकृत्वागायत्रींदेवताभ्यइतित्रिर्जपित्वा ॥ पुण्डरीकाक्षस्मरणेनश्राद्धद्रव्याणिसि
क्त्वा अद्यामुकगोत्रपितरमुकशर्मन्निदमासनंतेस्वधेति प्राचीनावीती पातितवामजानुः
पितृतीर्थेन जलतिलसमेतम् ॥ द्विगुणभुग्नकुशत्रयेण पित्रे दद्यात् ॥ एवमेवपितामहप्र
पितामहमातामहप्रमातामहवृद्धप्रमातामहेभ्यआसनन्दद्यात् ॥ ततोऽपहताअसुराइ
त्यादिनातिलान्विकीर्य्य॥आयन्तुनइतिजपित्वा॥ ॐ अद्यामुकगोत्रेत्यादिपूर्ववत्॥एता
निगन्धपुष्पधूपदीपवस्त्राणितुभ्यंस्वधेतियथासंभवंगंधादिदद्यात् ॥ ततःपात्रमालभ्य
पृथिवीतेपात्रमित्यादिजपित्वा॥इदंविष्णुरित्यादिनांगुष्ठमन्नेसंयोज्य॥ॐअद्यामुकगोत्र
पितरमुकशर्मन्निदमन्नंसव्यंजनंसतिलंतुभ्यंस्वधेत्युत्सृजेत्॥एवम्पितामहादिभ्यःप्रत्ये
कमुत्सृजेत् ॥ ततोयथाशक्तिपवित्रान्जपेत् ॥ततस्तदन्नम्ब्राह्मणायप्रतिपादयेत्॥ब्राह्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णोपवेशनपक्षेस्वागतप्रश्नाद्यधिकमितिप्रयोगः ॥अथभिक्षादानं॥ भिक्षादानंतुयदैवय
तिब्रह्मचारिणोरुपस्थितिस्तदैवकर्त्तव्यम् ॥नरसिंहपुराणे॥ भिक्षांचभिक्षवेदद्यात्परिव्रा
ड्ब्रह्मचारिणे ॥ कल्पितादन्नादुद्धृत्यसव्यंजनयुतादपि ॥ अकृतेवैश्वदेवेतुभिक्षौचगृह
मागते ॥ उद्धृत्यवैश्वदेवार्थंभिक्षांदत्वाविसर्जयेत् ॥ गौतमः ॥ स्वस्तिवाच्यभिक्षादानम
पूर्वं ॥ मार्कंडेयपुराणे ॥ ग्रासप्रमाणाभिक्षास्यादग्रंग्रासचतुष्टयम् ॥ अग्राच्चतुर्गुणंप्राहु
र्हंतकारंद्विजोत्तमाः॥भोजनंहंतकारंवाअग्रंभिक्षामथापिवा॥ अदत्वातुनभोक्तव्यंयथावि
भवमात्मनः॥अग्रंपुष्कलसंज्ञमपि॥विष्णुपुराणे॥ दद्याच्चभिक्षात्रितयंपरिव्राड्ब्रह्मचारि
णेस्वेच्छयाचबुधोदद्याद्विभवेसत्यवारितम् ॥ पाखंडानुपक्रम्यब्रह्मपुराणे ॥ तेभ्योदेयं
गृहाद्बहिः ॥ विष्णुः ॥ भिक्षाञ्चभिक्षवेदद्यादर्चितभिक्षादानेनगोप्रदानफलमवाप्नोति॥
भिक्षुकाभावेचाग्रंगोभ्योदद्यात् ॥ अग्नौवाक्षिपेत् ॥ भुक्तेऽप्यन्नेविद्यमानेभिक्षुकंनप्रत्या
चक्षीत ॥ ब्रह्मपुराणे ॥ यःपात्रपूरणींभिक्षांयतिभ्यः संप्रयच्छति ॥ विमुक्तःसर्वपापेभ्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नासौदुर्गतिमाप्नुयात् ॥ यमः ॥ हस्तदत्ताचयाभिक्षाव्यंजनंसलिलानिच ॥ भुक्त्वाचशु
चितांयातिदातास्वर्गंनगच्छति ॥ देवलः ॥ सायंप्रातर्गृहद्वारंभिक्षार्थंनावघट्टयेत् ॥ भिक्षु
कवारणार्थंद्वारंनावरुंध्यादित्यर्थः॥अथगोग्रासः॥ब्रह्मपुराणे॥सौरभेय्यः सर्वहिताः पवि
त्राःपुण्यराशयः ॥ प्रतिगृह्णंतुमेग्रासंगावस्त्रैलोक्यमातरः॥दद्यादनेनमंत्रेणगवांग्रासंसदै
वहि ॥ सदैवहीत्युक्तेर्नित्याधिकारः ॥ भारते ॥ घासमुष्टिंपरगवेसान्नंदद्याच्चयः सदा ॥
अकृत्वास्वयमाहारंस्वर्गलोकंसगच्छति ॥ अकृत्वास्वयमाहारमितिश्रवणाद्भोजनात्प्राग्
ग्रासदानंनतुतत्रकालनियमः॥फलश्रवणाच्चात्रसकामाधिकारोपि ॥ भविष्यपुराणे ॥ तृ
णोदकेनसंयुक्तंप्रदद्याच्चगवाह्निकं ॥ कपिलाशतदानस्यफलंविंद्यान्नसंशयः ॥ पंचभूते
शिवेपुण्येपवित्रेसूर्यसंभवे ॥ प्रतीक्षेमंमयादत्तंसौरभेयिनमोऽस्तुते ॥ गवाह्निकंगवायद
ह्लाभुज्यतेपंचभूतइत्यादिनागवाह्निकदानमंत्रः ॥ गोग्रासदानमंत्रस्तुसौरभेय्यइत्यादिः
प्रागुक्तः ॥ अथातिथिपूजा ॥ तत्रवसिष्ठः ॥ पितृभ्योदद्यात्ततोऽतिथीन्पूजयेत् ॥ एवंचात्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यश्राद्धानंतरमतिथिपूजाविधानात्स्मृत्यंतरेवैश्वदेवानंतरंवैश्वदेवात्प्रागागतो ऽपिना
तिथिरित्येवपरं ॥ तथाचपराशरशातातपौ ॥ प्रियोवायदिवाद्वेष्योमूर्खः पण्डितएववा ॥
वैश्वदेवेतुसंप्राप्तेसोऽतिथिः स्वर्गसंक्रमः ॥ हारीतः ॥ सर्वाअस्यदेवतागृहानभ्यागच्छंति
यस्यैवंविद्वान्ब्राह्मणोगृहमभ्येतितमनभ्युत्तिष्ठतः प्राणदेवताअपक्रामन्ति ॥ अत्रबृह
स्पतिः ॥ प्रीतयेस्वागतेनाग्निरासनेनशतक्रतुः ॥ पितरः पादशौचेनभोजनेनप्रजापतिः॥
शातातपः ॥ भिक्षांवापुष्कलंवापिहन्तकारमथापिवा ॥ असंभवेसदादद्यादुदपात्रमथा
पिवा ॥ पारस्करः ॥ उद्धृत्यान्नंब्राह्मणायावनेज्यदद्यादुदकंततइति ॥ एवंचातिथ्यभावे
अन्येनापिब्राह्मणेनमनुष्ययज्ञसिद्धिः ॥ अभ्यागतानुवृत्तौवसिष्ठः ॥ तंभोजयित्वोपासी
ततोगछन्तमासीमान्तमनुव्रजेदनुज्ञानाद्वा ॥ आपस्तम्बः ॥ यानवन्तमायानाद्यावन्ना
नुजानीयादितरमप्रतिभायामासीम्नोनिवर्त्तेत ॥ इतरंयानशून्यम् ॥ अप्रतिभायामनु
ज्ञानास्फूर्त्तौ ॥ विष्णुपुराणे ॥ अनिकेताह्यनाहारायेचसायंगृहागताः॥ तेषांगृहस्थःसर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षांप्रतिष्ठायोनिरेवचं ॥ प्रतिष्ठाआश्रयः ॥ योनिरन्नादिदानेनजीवनहेतुः ॥ तथा ॥ दिवा
तिथौतुविमुखेगतेयत्पातकन्नृणाम् ॥ तदेवाष्टगुणंपुंसांसूर्योढेविमुखेगते ॥ सूर्योढःसूर्या
स्तमयसमयः ॥ विष्णुः ॥ प्रतिश्रयंतथाशय्याम्पादाभ्यङ्गंसदीपकम् ॥ प्रत्येकदानेना
प्नोतिगोप्रदानसमम्फलम् ॥ प्रतिश्रयोवासगृहम् ॥ मनुः ॥ आसनासनशय्याभिरद्भि
र्मूलफलेनवा ॥ नास्यकश्चिद्वसेद्गेहेशक्तितोऽनर्चितोऽतिथिः ॥ आपस्तम्बः ॥ एकरात्रि
ञ्चेदतिथिंवासयेत्पार्थिवांल्लोकानभिजयति ॥ द्वितीयामान्तरिक्षान्तृतीयांदिव्यान्चतु
र्थींपारवतोलोकानपरिमितिपरिमितान्जयतीतिप्रत्यभिज्ञायते ॥ यमः ॥ नपृच्छेद्गोत्रञ्च
रणंदेशन्नामकुलंश्रुतम् ॥ अध्वनोऽभ्यागतंविप्रंभोजनेसमुपस्थितम् ॥ चरणंशाखाविशे
षव्यवस्थितिः ॥ तथा ॥ देशङ्गोत्रंकुलंविद्यामन्नार्थंयोनिवेदयेत् ॥ वैवस्वतेषुधर्मेषुवान्ता
शीसनिगद्यते ॥ तथा ॥ अपिशाकंपचानस्यशिलोञ्छेनापिजीवतः ॥ स्वदेशेपरदेशेवाना
तिथिर्विमनाभवेत् ॥ मनुः ॥ तृणानिभूमिरुदकंवाक्चतुर्थीचसूनृता ॥ एतान्यपिसताङ्गे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेनोच्छिद्यन्तेकदाचन ॥ तथा॥ वैश्वदेवेतुनिर्वृत्तेयद्यन्योऽतिथिराव्रजेत् ॥ तस्याप्यन्नंय
थाशक्तिप्रदद्यान्नबलिंहरेत् ॥ वैश्वदेवेहोमाद्यर्थपाकेवैश्वदेवस्यसिद्धस्येत्यादौदर्शनात्॥
निर्वृत्तेव्यतीते नबलिंहरेत्॥अतिथ्यर्थंपुनःपाकेकेवलबलिहरणानिषेधः ॥ केचिद्व्याचक्षते
वैश्वदेवहोमान्तेऽतिथ्यन्तरोपस्थितौतस्मैदत्वाबलिहरणंनकर्त्तव्यमित्यर्थः ॥ तदयुक्तम्ब
लिहरणात्पूर्वमतिथ्यन्नदानेनस्मृत्यन्तरविरोधात् ॥ अन्नाल्पत्वेबलिहरणविरोधेऽप्य
तिथयेऽन्नदानमित्यपिनव्याख्यानंयुक्तम् ॥ नबलिंहरेदित्यविशेषितश्रवणात् ॥ अतएव
बलिमपिनहरेदितिस्तुतिरितिव्याख्योपेक्ष्याअप्यर्थाध्याहारदोषाच्च ॥ पराशरशातात
पौ ॥ अचिन्तितमनाहूतंदेशकालउपस्थितम् ॥ अतिथिन्तंविजानीयान्नातिथिःपूर्वमाग
तः ॥ देशः उपस्थितंगृहेविद्याद्भार्यायत्राग्नयोपिवेति मनुविष्णुशातातपैरुक्तः कालो वैश्व
देवोत्तरः प्रागुक्तः ॥ याज्ञवल्क्यः ॥ अध्वनीनोऽतिथिर्ज्ञेयः ॥ गौतमः ॥ असमानग्रामी
णोऽतिथिरेकरात्रिकः ॥ एकरात्रिकस्तद्दिनागतः ॥ पूर्वन्तुद्वितीयदिनादावपिवासनम्फ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लार्थमुक्तम् ॥ आपस्तम्बः ॥ धर्मपुरस्कारोनान्नप्रयोजकः सोऽतिथिर्भवति॥धर्मपुरस्कारस्तीर्थयात्रादिप्रवृत्तस्तत्रातिथिरेवसम्बध्यते ॥ अत्रप्रयोजकोभोजनार्थमटनशीलः ॥ ॥ मनुः ॥ ब्राह्मणस्यत्वनातिथिर्गृहेराजन्यउच्यते ॥ वैश्यशूद्रौसखाचैवज्ञातयोगुरुरेवच॥ यदित्वतिथिधर्मेणक्षत्रियोगृहमाव्रजेत् ॥ भुक्तवत्सुतुविप्रेषु कामन्तमपिभोजयेत् ॥ वैश्यशूद्रावपिप्राप्तौकुटुम्बेऽतिथिधर्मिणौ ॥ भोजयेत्सहभृत्यैस्तावानृशंस्यंप्रयोजनम् ॥ इतरानपिसख्यादीन्संप्रीत्यागृहमागतान् ॥ प्रकृत्यान्नंयथाशक्तिभोजयेत्सहभार्यया ॥ कुटुम्बेगृहे ॥ आनृशंस्यंदया॥प्रकृत्यपक्त्वा॥सहभार्ययासहितः ॥ बौधायनः ॥ सायंप्रातर्यदन्नंस्यात्तेन वैश्वदेवबलिमुपसंहृत्य ब्राह्मणक्षत्रियविट्शूद्रानभ्यागतान्यथाशक्त्या पूजयेत् ॥ यदिबहूनांनशक्नुयात्तदाएकस्मैगुणवतेदद्याद्योवाप्रथममागतःस्यात् ॥ गौतमः ॥ ऋत्विक्-श्वशुरपितृव्यमातुलानामुपस्थानेमधुपर्कःसंवत्सरेपुनर्यज्ञविवाहयोरर्वाक् राज्ञश्चश्रोत्रियस्याचार्यस्य अश्रोत्रियस्यासनोदके ॥ तथा ॥ श्रोत्रियस्यपाद्यम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्घमन्नविशेषांश्चप्रकारयेत्॥नित्यंवासत्कारविशिष्टंमध्यतोन्नदानमवैधेसाधुवृत्तौ विपरी
तेतृणोदकभूमिस्वागतमन्नतः पूजाऽनत्यासश्च ॥ श्रोत्रियो वेदानामेकैकांशाखामधीत्य
श्रोत्रियोभवतीत्यापस्तम्बोक्तेः ॥ नित्यंयादृशमहरहर्गृहेपच्यते ॥ मध्यतोमध्यविधादरे
ण ॥ अवैधेमूर्खेविपरीतेऽसाधुवृत्तेअनत्यासोऽनतिक्रमः ॥ आपस्तम्बः ॥ ब्राह्मणायान
धीयमानायासनमन्नमुदकमितिदेयंनप्रत्युपतिष्ठेताऽभिवादनायोत्तिष्ठेत ॥ अभिवाद्यश्चे
त्॥राजन्यवैश्यौचशूद्रमभ्यागतङ्कर्मसुनियुंज्यात् ॥ अथास्मैदद्यात् ॥ राजन्यवैश्यौचे
तिनप्रत्युत्तिष्ठेतेत्यनुषङ्गः ॥ तथा ॥ सर्वान्वैश्वदेवभागिनःकुर्वीत श्वचाण्डालेभ्योवाना
नर्हद्भ्योदद्यादित्येके ॥ नानर्हद्भ्यइतिनिषेधात्तेभ्योदानमनावश्यकम् ॥ अपिकीटपतङ्गा
नांशुनाञ्चाण्डालयोनिनाम् ॥ दत्वान्नंलोकमाप्नोतिप्राजापत्यंसमाःशतमितिनन्दिपुरा
णात् ॥ ॥ फलार्थत्वस्यैवावगमात् ॥ जाबालिः ॥ अस्नाताशीमलंभुंक्तेअजपीपूयशोणि
तम् ॥ अहुत्वातुकृमिंभुंक्तेअदत्वाविड्विभोजनम् ॥ अघंसकेवलंभुंक्तेयःपचत्यात्मकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णात् ॥ इन्द्रियप्रीतिजनकंवृथापाकंविवर्जयेत् ॥ शङ्खलिखितौ ॥ नभोजनार्थीपाकशा
लाम्प्रविशेत् ॥ नन्दिपुराणे ॥ यतेतब्राह्मणंपूर्वंभोक्तुमन्नंसदागृही ॥ देवलः ॥ नाघृतंभो
जयेद्विप्रंस्वगृहेसतिसर्पिषि ॥ परत्रनिरयंघोरंगृहस्थःप्रतिपद्यते ॥ मिष्टमन्नंस्वयंभु
क्त्वापश्चात्कदशनंलघु ॥ ब्राह्मणंभोजयेन्मूर्खोनिरयेचिरमाविशेत् ॥ वसिष्ठः ॥ महये
च्चयथाशक्तिसर्वदासर्वभूतानि ॥ गृहस्थएवयजतेगृहस्थस्तप्यतेतपः ॥ चतुर्णामाश्रमा
णान्तुगृहस्थस्तुविशिष्यते ॥ महयेत्पूजयेत् ॥ पैठीनसिः ॥ चत्वारोह्याश्रमाः ब्रह्मचारी
गृहस्थोवानप्रस्थोभिक्षुश्चेतिसर्वेगृहस्थमूलास्तदुपजीविनः इति ॥ गृहस्थमूलागृहस्थ
स्यैवपूज्योपादानाधिकारित्वात् ॥ दक्षः ॥ देवैश्चैवमनुष्यैश्चतिर्यग्भिश्चोपजीव्यते ॥ गृ
हस्थःप्रत्यहंयस्मात्तस्माज्ज्येष्ठोगृहाश्रमी ॥ याज्ञवल्क्यः ॥ बालस्त्ववासिनीवृद्धगर्भि
ण्यातुरकन्यकाः ॥ सम्भोज्यातिथिभृत्यांश्चदम्पत्योःशेषभोजनम् ॥ दक्षः ॥ पञ्चमेचत
थाभागेसंविभागोयथार्हतः ॥ देवपितृमनुष्याणांकीटानाञ्चोपदिश्यते ॥ संविभागन्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थाकृत्वागृहस्थःशेषभुग्भवेत् ॥ संविभागोविभज्यप्रतिपादनम् ॥ अथभोजनविधिः ॥
॥ तत्रबौधायनः ॥ सुप्रक्षालितपाणिपादोऽपआचम्यशुचौसंवृतेदेशेअन्नमुपसंगृह्य
कामक्रोधलोभमोहानपहत्यसर्वाभिरंगुलीभिःशब्दमकुर्वन्प्राश्नीयात् ॥ ब्रह्मपुराणे॥
आसनस्थस्तुयोदर्पात्पंक्तिमध्यउपस्पृशेत् ॥ ससर्वेषान्तुयत्पापंतद्गृण्हातिनराधमः ॥
तस्माद्बहिरुपस्पृश्यआचान्तःप्रविशेद्गृहम् ॥ तथा ॥ पात्रेष्वर्थानुरूपेषुपुत्रभृत्यानुजैःस
ह ॥ भूम्यांपात्रंप्रतिष्ठाप्यमौनेनान्नन्तुभक्षयेत् ॥ पवित्रपाणिःपुण्यञ्चलभेत्तत्राघमर्ष
णम् ॥ अघमर्षणजन्यपुण्यमितिसामानाधिकरण्यम् ॥ लभेज्जपेदित्येके ॥ तन्मतेनाघ
मर्षणमुख्यमेव ॥ विष्णुराणे ॥ विशुद्धवदनः प्रीतोभुंजीतनविदिङ्मुखः॥विदिङ्मुखः॥
आग्नेयीनैर्ऋतीवायव्यैशान्यभिमुखः ॥ हारीतः ॥ नोदङ्मुखोनाधिशयनेआसनेअ
श्नीयात् ॥ अधिउपरि ॥ शयनेशय्यायाम् ॥ आसनेपीठादौ ॥ अन्नंकृत्वेतिशेषः ॥ वा
मनपुराणे ॥ भुंजीतनोदङ्नचदक्षिणामुखोनचप्रतीचीमभिभोजनीयम् ॥ एतेउद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्ददक्षिणाप्रत्यङ्मुखनिषेधानिष्कामस्य ॥ तथाचमनुः ॥ आयुष्यंप्राङ्मुखोभुंक्तेयश
स्यन्दक्षिणामुखः ॥ श्रियम्प्रत्यङ्मुखोभुंक्तऋतम्भुंक्तउदङ्मुखः ॥ श्रियमृतमित्युभय
त्रकामयमानइतिशेषः ॥ ऋतंसत्यंयज्ञंवा ॥ दक्षिणामुखभोजनम्प्रमीतमातृविषयम्
॥ तथाचापस्तम्बः ॥ नदक्षिणामुखोभुंजीतअनायुषत्वेवैमुख्यस्यभोजनम्मातुरित्युप
दिशन्ति ॥ प्राङ्मुखोऽन्नानिभुंजीतपञ्चार्द्रोवाग्यतः शुचिः ॥ आर्द्रपादस्तुभुंजानःशतं
वर्षाणिजीवति ॥ पंचार्द्रःपादद्वये करद्वयेमुखेच ॥ पुनरार्द्रपादोपादानंफलार्थं ॥शङ्खः ॥च
तुष्कोणंद्विजाग्र्यस्यत्रिकोणंक्षत्रियस्यतु॥मंडलाकृतिवैश्यस्यशूद्रस्याभ्युक्षणंस्मृतं॥ ब्र
ह्मपुराणे॥चतुरस्रंत्रिकोणंचमंडलंचार्द्धचंद्रकं॥कर्त्तव्यमानुपूर्व्येणब्राह्मणादिषुमंडलं॥ ब्र
ह्मरुद्रेंद्रचंद्रार्कवसवोमंडलांतरात्॥निवेदितंनरैरन्नंयस्माद्भुंजंतिनान्यथा ॥ एवंचब्रह्मादी
नांभोजनकालेबलिर्देयः॥मंडलार्थंवादमात्रमेतदितिचेत् न तस्यापिसालंबनत्वात् ॥ अ
सताप्यर्थेनस्तुतिरितिचेन्न ॥ असंभवेहितथास्यात् ॥ नचैवंवाक्यभेदःसूक्तवाक्यादवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्प्यत्वात् ॥ विष्णुपुराणे ॥ प्रशस्तरत्नपाणिस्तुभुंजीतप्रयतोगृही ॥ प्रशस्तरत्नंगा
रुडादि ॥ मनुः॥ पूजयेदशनंनित्यमद्याच्चैतदकुत्सयन् ॥ दृष्ट्वाहृष्येत्प्रसीदेच्चप्रतिनंदेच्चस
र्व्वदा ॥ ब्रह्मपुराणे ॥ वामेनपाणिनापात्रंगृहीत्वाभुविसंस्थितम् ॥ तेजोऽसीतिजपन्नन्न
प्रणमेदमृतंचतत् ॥ विष्णुपुराणे ॥ अन्नंप्रशस्तंपथ्यंचप्रोक्षितंप्रोक्षणोदकैः ॥ ब्रह्मपुरा
णे ॥ अपोशानंचगृह्णीयात्सर्वतीर्थमयंचयत् ॥ अमृतोपस्तरणमसीतिविष्णोरन्नमयस्य
च ॥ असीत्यनंतरंस्वाहाकारंकुर्वंति ॥ हस्तेनलंघयेन्नान्नंसोदकेनकदाचन ॥ तथा ॥ प्रा
णेभ्यस्त्वथपंचभ्यः स्वाहाप्रणवसंयुताः ॥ पंचाहुतीःप्रजुहुयात्प्रलयाग्निनिभेष्विति ॥
प्राणाःप्राणापानव्यानसमानोदानाअत्रैवक्रमोक्ताः ॥ स्वाहाप्रणवसंयुताः स्वाहान्ताःप्र
णवाद्याः ॐ प्राणायस्वाहा ॐ अपानायस्वाहा ॐ व्यानायस्वाहा ॐ समानायस्वा
हा ॐ उदानायस्वाहा इत्येवंरूपाः प्रलयाग्निनिभेष्वितिध्येयत्वार्थम् ॥ याज्ञवल्क्यः ॥
प्राणोव्यानस्तथापानः समानोदानएवच ॥ ॐ कारपूर्वैःस्वाहांतैःपंचदद्यात्तथाहुतीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुपुराणे॥ पंचग्रासान्महामौनंप्राणाद्याप्यायनायतत् ॥ महामौनमितिसर्वथाध्वनि
निवृत्तिरभिहिता॥प्राणापानसमानानामुदानव्यानयोस्तदाक्रमान्तरेणोक्ताः॥एताश्चा
हुतयोनदंतेनभेद्याः॥प्राणायस्वाहेत्येकयाहुत्यासर्वान्प्राणान्प्रीणातीतिसमस्तान्निगिरे
दितिहारीताभिधानात् अंगुष्ठानामिकामात्रग्राह्याअन्नेताआहुतयइतिहारीतव्याख्या
तारः॥ सर्वांगुलीभिरश्नीयादितिसामान्यविधेस्तुपंचग्रासस्यापितथैवक्षुद्रताचग्रासानां
गिलनसामर्थ्याल्लभ्यते॥ विष्णुपुराणे॥ प्रज्ञाढ्योब्रह्मचारीस्यात्पक्वान्नैर्वर्द्धतेचसः॥ प्रा
णाग्निहोत्रविद्विप्रोदाताचस्यात्समृद्धिमान्॥ भोजनविद्यनन्तरं बौधायनः॥ सएवमेवा
हरहःसायंप्रातर्जुहुयादितिप्राणाहुत्यभिप्रायम्॥ तथा गृहस्थोब्रह्मचारीवायोऽनश्नंश्च
तपश्चरेत्॥ प्राणाग्निहोत्रलोपेनअवकीर्णीभवेत्तुसः अन्यत्रप्रायश्चित्तात् ॥ प्रायश्चि
त्तेतदेवविधानम्॥प्राणाग्निहोत्रमंत्रांस्तुनिरुद्धोभोजनेजपेत्॥त्रेताग्निहोत्रमंत्रान्वैद्रव्या
लाभेयथाजपेत्॥ गृहस्थोत्राहिताग्निः॥ अनड्वान्ब्रह्मचारीचआहिताग्निश्चतेत्रयः॥ अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्नंतएवसिध्यंतिनैषांसिद्धिरनश्नतामित्यापस्तम्बवचनात् ॥ प्राणाग्निहोत्रंप्राणाहुतिः ॥
त्रेतागार्हपत्याहवनीयदक्षिणाग्निरूपमग्नित्रयम् ॥ द्रव्यालाभेऽग्निहोत्रविहितद्रव्याला
भे ॥ मनुः ॥ सायंप्रातर्द्विजातीनामशनंदेवनिर्मितम् ॥ नांतराभोजनंकुर्यादग्निहोत्रसमो
विधिः ॥ अन्तराभोजननिषेधोमूलफलादन्यत्र ॥ तथाचापस्तम्बः॥ दिवाचनभुंजीतान्य
त्रफलमूलेभ्यइति चकारः पुनरर्थे ॥ छन्दोगपरिशिष्टे ॥ ऋषिभिर्द्विरशनमुक्तंविप्राणाम
प्रवासिनाम् ॥ सततंनित्यमहनिचतथातमस्विन्यांसार्द्धप्रहरयामान्तः॥ अहनीतिसति
संभवेपंचमभागपरंदक्षदर्शनात् ॥ तपस्विन्यांरात्रौसार्द्धप्रहरयामांतः ॥ अर्द्धप्रहरसहि
तप्रथमप्रहरे ॥ एवंचमन्वादावपिसायंप्रातश्चैतदनुसाराद्व्याख्येयम् ॥ अत्रहारीतः ॥ न
कार्ष्णायसेनमृत्पात्रेनभिन्नेनावकीर्णे ॥ कर्ष्णायसेलोहपात्रे भिन्नेस्फुटिते अवकीर्णेशूद्र
भोजनादिनापवित्रे ॥मनुः ॥ नभिन्नभांडेभुंजीतनभावप्रतिदूषिते ॥ पैठीनसिः ॥ ताम्बर
जतसुवर्णशंखमुक्ताफलंभिन्नमितिनदोषः॥अत्रविष्णुपुराणे॥ नासंदीस्थितेपात्रे॥ आसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीवेत्रादिनिर्मितमुच्चमासनम् ॥ अत्रविष्णुः ॥ नभुविपाणौलवणम् ॥ वसिष्ठः ॥ भार्य
यासहनाश्नीयादवीर्यवदपत्यंभवतीतिवाजसनेयिकेविज्ञायते ॥ ब्रह्मपुराणे ॥ ब्राह्मण्या
भार्ययासार्द्धंक्वचिद्भुंजीतचाध्वनि ॥ असवर्णस्त्रियासार्द्धंभुक्त्वापततितत्क्षणात्॥ ब्राह्मणी
पदंसवर्णोपलक्षणं ॥अपस्तंबः॥ ननाविभुंजीत तथाप्रासादेकृतभूमौभुंजीत॥प्रासादेदा
रुबद्धतलइत्याहुः कृतभूमौमृदादिप्रक्षेपेणसंपादितभूमौनाविप्रासादेच ॥ हारीतः॥ न
क्रुद्धोनान्यमनानाभिभाषमाणोऽश्नीयान्नाशिशून्निर्भर्त्सयन्नाप्रदायप्रेक्ष्यमाणेभ्यः ॥
यमः॥ अश्नातियोभृत्यजनस्यमध्येमिष्टान्नमेकोरसगृध्नबुद्धिः ॥ दीनैःकटाक्षैरभिवीक्ष्य
माणोव्यक्तंविषंहालहलंचभुंक्ते ॥ देवलः॥ एकवस्त्रोनभुंजीतकपाटमपिधायच ॥ कपा
टमपिधायद्वारमावृत्य ॥स्वग्रामेग्रामतोवापिसन्निकृष्टेमृतेसति ॥ नभुंजीताशनंधीमान्
धर्म्यंवैशोककारणात् ॥ गौतमः ॥ नभक्ष्यानुत्संगेभक्षयेत् नवारात्रौप्रेष्याहृतंदास्याहृतं
दुग्धादि ॥ शंखः॥ नानियुक्तोऽग्रासनंगच्छेत् नअग्रासनस्थःप्रथममश्नीयात् ॥ नाधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कंदद्यात् नप्रतिगृह्णीयात् मनुः ॥ नभुंजीतोद्धृतस्नेहंनातिसौहित्यमाचरेत् ॥ नातिप्रगेना
तिसायंनसायंप्रातराशितः ॥ अतिप्रगेसूर्योदयसन्निधौअतिसायंमहानिशायां ॥ नसा
यमित्यादिप्रातर्भोजनेनैवतृप्तःसायंपुनर्भोजनंनकुर्यादित्यर्थः ॥ बृहस्पतिः ॥ नस्पृशे
द्वामहस्तेनभुंजानोऽन्नंकदाचन ॥ नपादौनशिरोबस्तिंनपदाभाजनंस्पृशेत् बस्तिर्ना
भेरधोदेशः ॥ याज्ञवल्क्यः ॥ नभार्यादर्शनेऽश्नीयान्नैकवासानसंस्थितः ॥ भार्यादर्शने
भार्ययादृश्यमानः पश्यन्नितिकेचित् ॥ ब्रह्मपुराणे ॥ अप्येकपंक्त्यांनाश्नीयात्संबंधि
स्वजनैः सह ॥ कोहिजानातिकिंकस्यप्रच्छन्नंपातकंभवेत् ॥ भस्मस्तंभजलद्वारमार्गैः
पंक्तिंचभेदयेत् ॥ कोहिजानातीत्यादिनापातकसंदेहेएकपंक्त्यांनभोक्तव्यमित्युक्तम् ॥
निर्दोषत्वेतुनिश्चितेभोक्तव्यमेव ॥ भस्मस्तंभादिनाचपंक्तिभेदाभिधानेपातकिनापिसह
एकपंक्त्यांभोजनेदोषोनास्तीत्यर्थः ॥ महाभारते ॥ पानीयंपायसंसर्पिर्मधुयुक्तंमधून्य
पि ॥ निरस्यशेषमेतेषांनप्रदेयंतुकस्यचित् ॥ निरस्यत्यक्त्वातेन यदिदैवाच्छेषमनुतिष्ठ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तितदानदेयमित्यर्थः ॥ निरस्यमितिपाठेतुशेषंनधार्य्यमित्यर्थः ॥ तदाहब्रह्मपुराणे ॥ ति
लकल्कंदधिक्षीरजलक्षौद्रघृतानिच ॥ नत्यजेदर्धजग्धानिसक्तूँश्चाथकदाचन॥क्षौद्रंमधु
अर्धजग्धानिअर्धभुक्तानि ॥ विष्णुः ॥नगोब्राह्मणोपरागेचाश्नीयात् नराजव्यसनेप्रवा
सितश्चाग्निहोत्रीयदाग्निहोत्रंहुतंमन्यतेतदाश्नीयात् यदाकृतंमन्यतेवैश्वदेवमपि पर्वणि
चयदापर्वकृतंमन्यते ॥ उपरागेअत्यंतपीडायां॥ तथाननग्नोनोत्कटोनचभिन्नासनगतः
॥ उत्कटासनगतः ॥ तथा नाकाशे ॥ आकाशोत्रहिंदोलादिरितिहलायुधनिबंधः ॥ तथा
नबहूनांप्रेक्ष्यमाणानांनैकस्मिन्बहवस्तथा शून्यालयेवन्हिगृहेदेवागारेकथंचन ॥तथा ॥
शयानः प्रौढपादस्तुकृत्वाचैवावसक्थिकाम् ॥ तथा पिबेन्नांजलिनातोयं ॥ तथा नभावदु
ष्टमश्नीयात् ॥ भावदुष्टंयत्रमनःप्रसादोनभवति ॥ तथा ॥ नैकोमिष्टंनोद्धृतस्नेहंनादि
वाधानानरात्रौतिलसंवर्द्धनकोविदारवटपिप्पलशणशाकं दधिसक्तून्न ॥ दधिसक्तूनित्य
त्रापिरात्रावित्यर्थः यमः खट्वारूढोनभुंजीतनचोत्तानः कदाचन ॥ ब्रह्मपुराणे ॥ यस्तुपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णितलेभुंक्तेयस्तुफूत्कारसंयुतं ॥ प्रसृतांगुलिभिर्यश्चतस्यगोमांसवच्चतत् ॥ नाजीर्णेभो
जनंकुर्यात्साम्बुर्नातिबुभुक्षितः ॥ हस्त्यश्वरथयानोष्ट्रप्रासादस्थोनभक्षयेत् ॥ श्मशा
नाभ्यंतरगतोदेवालयगतोपिवा॥शयनस्थोनभुंजीतनपाणिस्थंनचासने ॥ नसंध्ययोस्तु
मध्यान्हेनार्द्धरात्रेकदाचन ॥ नार्द्रवासानार्द्रशिरानचायज्ञोपवीतवान् ॥ नप्रसारितपा
दस्तुपादारोपितपाणिमान् ॥ नावसक्थिकसंस्थश्चनचपर्यङ्कमास्थितः ॥ नवेष्टितशिरा
श्चापिनासन्दीकृतभाजनः ॥ नैकवस्त्रोदुष्टमध्येसोपानत्कःसपादुकः ॥ नचर्मोपरिसं
स्थश्चचर्मवेष्टितपार्श्ववान् ॥ अन्नस्यजन्मकालुष्यंदुःपक्तिञ्चनकुत्सयेत् ॥ ग्रासशेषंन
चाश्नीयात्पीतशेषम्पिबेन्नतु ॥ शाकमूलफलेक्ष्वादिदन्तच्छेदैर्नभक्षयेत् ॥ सञ्चयेन्नान्नम
न्नेनविक्षिप्तंपात्रसंस्थितम् ॥ बहूनाम्भुंजतांमध्येनचाश्नीयात्त्वरान्वितः ॥ वृथानविकिरे
दन्नंनोच्छिष्टः कुत्रचिद्व्रजेत् ॥ नस्पृशेत्स्वशिरोविप्रः स्वोच्छिष्टेनैवपाणिना ॥ प्रसृतांगु
लिभिर्विस्तृतांगुलिभिः ॥ यानमुपात्तहस्त्यादिव्यतिरिक्तंदोलादि ॥ अर्द्धरात्रे रात्र्यादा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वन्तेचसार्द्धैकप्रहरंविहायमध्यरात्रेमहानिशाभोजने ॥ चर्मवेष्टितपार्श्ववान् सन्नाहादिवे
ष्टितगात्रः ॥ जन्मनिन्दितदेशाद्युत्पत्तिःकालुष्यंमलिनत्वं दुष्पक्तिंदुष्टपाकम् ॥ दन्तच्छे
दैर्दंतैश्छित्त्वाछित्त्वा ॥ मुखप्रविष्टेतुदन्तव्यापारोनदुष्टः॥ सञ्चयेदित्यादिविस्तृतमोदना
दिअपूपादिनानराशीकुर्यात् ॥ मार्कण्डेयपुराणे ॥ उपघाताद्दतेदोषंनान्नस्योदीरयेद्बुधः॥
उपघातोऽशौचम् ॥ आङ्गिराः ॥ उपनीतंयदाचान्नंभोजनेसमुपस्थितम् ॥ आपीतरसमु
च्छिष्टंनदद्यान्नैवभोजयेत्॥उपनीतमन्यस्मैइतिशेषः ॥शङ्खलिखितौ॥ नतिष्ठंश्चखादेन्नच
हसन्नजल्पन्नावलोकयन्॥इतस्ततइतिशेषः॥देवलः॥ नभुंजीताघृतंनित्यंगृहस्थोभोजन
द्वयम् ॥ पवित्रमथहव्यञ्चसर्पिराहुरघापहम् ॥ विष्णुः ॥ नोच्छिष्टोघृतमादद्यान्नचन्द्रार्क
तारकानिरीक्षेतनमूर्द्धानंस्पृशेन्नब्रह्मकीर्त्तयेत् ॥ तथा ॥ ननिःशेषंभुञ्ज्यात् ॥ अन्यत्रद
धिमधुसर्पिः पयः सक्तुपलतिलोदकेभ्यः ॥ बौधायनः ॥ सर्वभक्ष्यापूपकन्दमूलमांसानि
दन्तैर्नावद्येत ॥ भक्ष्यत्वेनैवप्राप्तावपूपादीनाम्पृथगुपादानंदोषाधिक्यार्थम् ॥ लघुहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रीतः ॥ पृथक्पानंपुनर्दानंसामिषंपयसानिशि ॥ दन्तच्छेदनमुष्णञ्चसप्तसक्तुषुवर्जयेत् ॥
॥ आपस्तम्बः ॥ सोत्तराच्छादनञ्चैवयज्ञोपवीतीभुंजीत कृत्स्नंग्रासंग्रसेत्सांगुष्ठंनमुखश
ब्दंकुर्यान्नपाणिमवधुनुयात् ॥ एवञ्चात्रगृहीतग्रासकृत्स्नग्रसनविधानाद्ग्रासशेषंनचा
श्नीयादितिपात्रस्थशेषपरम् ॥ नपिण्डशेषम्पात्र्यामुत्सृजेदितिचबौधायनेनोक्तम् ॥
ग्रसितुंगृहीतस्यदैवाच्छेषस्थितौ ॥ विष्णुपुराणे ॥ अश्नीयात्तन्मनाभूत्वापूर्वन्तुमधुरंरस
म् ॥ लवणाम्लौतथामध्येकटुतिक्तादिकांस्ततः ॥ प्राग्द्रवम्पुरुषोऽश्नीयान्मध्येचकठिना
शनः ॥ पुनरंतेद्रवाशीचबलारोग्येनमुञ्चति ॥ ब्रह्मपुराणे ॥ कुर्यात्क्षीरांतमाहारंनचपश्चात्पि
बेदधि ॥ जठरंपूरयेदर्द्धमन्नैर्भागंजलेनच ॥ वायोःसंचरणार्थायचतुर्थमवशेषयेत् ॥ अ
धिअधिकं ॥ दधीतिपाठोविरुद्धः ॥ शातातपः ॥ विद्यमानेनहस्तेनब्राह्मणोज्ञानदुर्बलः ॥
तोयंपिबतिवक्त्रेणश्वासोजायेतनान्यथा ॥ उद्धृत्यवामहस्तेनयस्तोयंपिबतिद्विजः ॥ सुरा
पानेनतत्तुल्यंमनुराहप्रजापतिः ॥ उद्धृत्यवामहस्तेनगृहीत्यर्थः ॥ हस्तंप्रक्षाल्यगंडूषंयःपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बेदविचक्षणः ॥ सदेवांश्चपितॄंश्चैवआत्मानंचैवघातयेत् ॥ बौधायनः ॥ भुंजानेषुतुविप्रेषु यस्तुपात्रंपरित्यजेत् ॥ भोजनेविघ्नकर्त्तासौब्रह्महासतथोच्यते ॥ पात्रत्यागोदेशान्तरा गमनात् ॥ नत्वेतद्बलाद्भोजनकालेपात्रधारणाक्षेपः ॥ अथवानापजहीतापजहीतवेत्या पस्तम्बेन पात्रधारणाधारणयोर्विकल्पविधानाद्यदापात्रधारणपूर्वकं भोजनमारब्धं त दैवबोद्धव्यम् ॥ वृद्धशातातपौ ॥ दधिक्षीरघृतैर्भुक्त्वाप्रभूतैर्व्यंजनैस्तथा ॥ उष्णोदकैर्धान्य चूर्णैः करौश्मश्रूणिशोधयेत् ॥ देवलः ॥ भुक्त्वाचामेद्यथोक्तेनविधानेनसमाहितः ॥ शोध येन्मुखहस्तौचमृद्भिःसंघर्षणैरपि ॥ आचमनमुखादिशोधनयोरर्थात्पाठक्रमबाधः ॥ बौधायनः ॥ नातिसुहितोऽमृतापिधानमसीत्युपरिष्टादपः पीत्वाआचान्तःपुनराचम्य दक्षिणपादांगुष्ठेपार्ष्णिनिःस्त्रावयेत् ॥ अंगुष्ठमात्रःपुरुषोह्यंगुष्ठञ्चसमाश्रितः ॥ ईशःसर्व स्यजगतः प्रभुःप्रीणातिविश्वभुगिति ॥ सुहितस्तृप्तः ॥ हस्तद्वयेनावनेजनंब्रह्मपुराणा न्मतान्तरम् ॥ तथा ॥ मांसमत्स्यतिलमधुसंसृष्टम्प्राश्यापउपस्पृश्याग्निमभिस्पृशेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ब्रह्मपुराणे ॥ सम्मार्ज्यबाहूजानूचगोप्रदानफलंलभेत् ॥ भुक्त्वाचैवप्रतिष्ठेतनचाप्या
र्द्रेणपाणिना ॥ आचान्तोप्यशुचिस्तावद्यावत्पात्रमनुद्धृतम् ॥ उद्धृतेऽप्यशुचिस्तावद्याव
न्नोन्मृज्यतेमही ॥दक्षः॥ भुक्त्वाचसुखमास्थायतदन्नंपरिणामयेत् ॥ इतिहासपुराणाद्यैः
षष्ठसप्तमकौनयेत् ॥ अष्टमेलोकयात्राचबहिः सन्ध्याततः पुनः ॥ याज्ञवल्क्यः ॥ उपा
स्यपश्चिमांसन्ध्यांहुत्वाग्नींस्तानुपास्यच ॥ भृत्यैःपरिवृतोभुक्त्वानातितृप्तोऽथसंविशेत् ॥
॥दक्षः॥ प्रदोषपश्चिमौयामौवेदाभ्यासेनतौनयेत् ॥ यामद्वयेशयानश्चब्रह्मभूयायकल्प
ते ॥ ध्रुवम्प्रकृत्यब्रह्मपुराणे ॥ यदह्नाकुरुतेपापंदृष्ट्वातंनिशिमुच्यते॥यावत्यश्चेहताराश्च
शिशुमाराश्रितादिवि॥तावंत्येवतुवर्षाणिजीवत्यभ्यधिकानितु ॥ अभ्यधिकानिशतात्॥
अथशयनविधिः ॥तत्रविष्णुपुराणे॥ कृतपादादिशौचस्तुभुक्त्वासायंततोगृही ॥ गच्छेद
स्फुटितांशय्यामपिदारुमयींनृपः ॥ नाविशालांनवाभग्नांनासमांमलिनांनच ॥ नचजंतु
मयींशय्यांलंघितिष्ठेदनास्तृताम् ॥ प्राच्यांदिशिशिरः शस्तंयाम्यायामथवानृप ॥ स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैवस्वपतः पुंसोविपरीतंतुरोगदम् ॥ नन्दिपुराणे ॥ नमोनंदीश्वरायेतियःप्रोक्त्वासुप्य
तेनरः ॥ तस्यकूष्माण्डराजेभ्योनभविष्यतिवैभयम् ॥अत्रहारीतः॥ नाश्मपीठोपधाने
नतिर्य्यगुदकप्रत्यक्शिराः ननग्नोनाशुचिर्नचासनेनोच्छिष्टोनप्रगे ॥ प्रगेप्रातःकाले ॥
अत्रशङ्खलिखितौ ॥ नविशीर्णायाङ्कुट्टायांनान्यवर्णोपसेवितायामनभ्युक्ष्यनभूतयक्षग्रहा
यतनेषु ॥ नश्मशानवल्मीकमहावृक्षच्छायासुनपर्वनभस्युत्सवेवा ॥ पर्व्वात्रप्रतिपत्पञ्च
दश्योः संधिः॥उशनाः॥नतैलेनाभ्यक्तशिराःस्वपेत् ॥पैठीनसिः॥ नादीक्षितःकृष्णचर्माणि
सुप्यात् ॥ विष्णुः ॥ नार्द्रपादः सुप्यात् नोत्तरापराशिराःननग्नोनानुवंशं नाकाशे नपा
लाशेशयने नपंचदारुकृते नगजभग्नकृत्तौ नभिन्ने नाग्निप्लुष्टे नघटसिक्तद्रुमजे नश्मशा
ने नशून्यालये ॥ नदेवतायतनेषु नचजलमध्ये नधान्यगोगुरुहुताशनसुराणामुपरि नो
च्छिष्टो नदिवास्वपेन्नसंध्यायां नभस्मनिदेशेच नाशुचौ नार्हितः पर्वतमस्तके॥अनुवंशं
गृहमूर्द्धन्यकृतकाष्ठदैर्घ्यानुगतः ॥ अथदारोपगमः ॥ तत्रापस्तंबः सदानिशायांदारान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यलंकुर्वीत ॥ विष्णुपुराणे ॥ स्नातःसुगंधिधृक् प्रीतो नाध्मातः क्षुधितोऽपिवा ॥ सकामःसानुरागश्चव्यवायंपुरुषोव्रजेत् ॥ व्यवायोमैथुनम् ॥ बृहस्पतिः ॥ ऋतुकालाभिगमनं कुर्यात्पर्वाणिवर्जयेत् ॥ स्त्रियाःशुक्रेऽधिकेस्त्रीस्यात्पुमान्पुंसोऽधिकेभवेत् ॥ तस्माच्छुक्रविवृद्ध्यर्थंवृष्यंस्निग्धंचभक्षयेत् ॥ लेह्याहारांस्त्रियंकुर्य्यादेवंसंजनयेत्सुतम् ॥ ऋतुकालाभिगमनंपुंसाकार्यंप्रयत्नतः ॥ सदैववापर्व्ववर्ज्जंस्त्रीणामपिमतंहितत् ॥ पराशरः ॥ ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति ॥ सगच्छेन्नरकंघोरंब्रह्महेतितथोच्यते ॥ यमः ॥ ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति ॥ घोरायांब्रह्महत्यायांपच्यतेनात्रसंशयः ॥ भार्यामृतुमुखेयस्तुसन्निधौनोपगच्छति ॥ पितरस्तस्यतंमासंतस्मिन्रेतसिशेरते ॥ देवलः ॥ यस्तुदारानृतुस्नातान्स्वस्थःसन्नोपसर्प्पति ॥ भ्रूणहत्यामवाप्नोतिगर्भंप्राप्यविनाश्यसः ॥ स्वस्थोरोगादिरहितः ॥ बौधायनः ॥ त्रीणिवर्षाण्यृतुमतींयोभार्य्यांनोपगच्छति ॥ सतुल्यंब्रह्महत्यायादोषमृच्छत्यसंशयम् ॥ ऋतौनोपैतियोभार्यामनृतौयश्चगच्छति ॥ तुल्यमाहु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तयोर्दोषमयोनौयश्चसिञ्चति॥ अथमनुः॥ नोपगच्छेत्प्रमत्तोपिस्त्रियमार्त्तवदर्शने॥ स
मानशयनेचैवनशयीततयासह॥ रजसाभिप्लुतांनारींनरस्याभ्युपगच्छतः॥ प्रज्ञायशोब
लंवीर्य्यंविनाशमुपगच्छति॥ नानास्मृतिसंवादादृतुकालगमनउभयनियमः॥ ऋतौग
च्छेदेव ऋतावेवगच्छेदितिच॥सदैवेतिअनृतावपीत्यर्थः॥पर्व्ववर्जमितिपर्वपदंनिषिद्धका
लोपलक्षणम्॥स्त्रीणामभिमतंहितदितिहेतुनिर्द्देशात्॥स्त्रियाःसकामत्वेनरक्षणार्थमनृता
वपिगमनम्॥ नोचेदृतावेवेतिव्यवस्थितविकल्पः॥ याज्ञवल्क्यः॥ स्वस्थइन्दौसकृत्पुत्रं
लक्षण्यंजनयेत्पुमान्॥ तथा॥ षोडशर्त्तुनिशाःस्त्रीणाम्॥ तत्रमनुः॥ तासामाद्याश्चतस्र
स्तुनिंदितैकादशीचया॥ त्रयोदशीचशेषास्तुप्रशस्तादशरात्रयः॥ युग्मासुपुत्राजायंते
स्त्रियोऽयुग्मासुरात्रिषु॥ आपस्तम्बः॥ स्त्रीवाससैवसन्निपातः स्यात् यावत्सन्निपातंच
वै सह शय्यां भित्त्वाततोनानाउदकोपस्पर्शनमपिवालेपान्प्रक्षाल्याचम्यप्रोक्षणमंगा
नाम्॥ स्त्रीवासःस्त्रीसंभोगार्थंवासः॥ सन्निपातोऽभिगमः नानाभिन्नाशय्येत्यन्वयः उद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोपस्पर्शनंस्नानम् ॥ एतच्चऋतुगमने नोचेदित्यादिपक्षान्तरमनृतौ ।
तपः ॥ ऋतौतुगर्भशंकित्वास्नानंमैथुनिनःस्मृतं ॥ अनृतौतुसदाकार्य्यं याचवृद्धशाता
ति ॥ गौतमः ॥ नमैथुनीभूयशौचंप्रतिविलंबेत् ॥ शौचमत्रलेपक्षालनमूत्रपुरीषवदि
तुगमनेचस्नानंतुपूर्वोक्तकर्माधिकारापादकंनतुचाण्डालादिस्पर्शवद्दमनमात्रम् ॥ ऋ
न्यते॥यच्चस्नानेनापनीयेत॥ येनवारात्रावपिस्नानंस्यात्॥ अतःस्नामनेनाप्रायत्यंज
द्धशातातपः ॥ द्वावेतावशुचीस्यातांदम्पतीशयनंगतौ ॥ शयनादुत्प्रातरेवेतिवृद्धाः॥वृ
दशुचिः पुमान् ॥ शुचिः स्नानप्रोक्षणेविनापि नतुलेपक्षालनाच्चमतानारीशुचिः स्या
विष्णुपुराणे ॥नस्नातांतुस्त्रियंगच्छेन्नातुरांनरजस्वलाम्॥ नानिष्टनयोर्निवृत्तिरित्याहुः॥
नगुर्व्विणीम् ॥ नादक्षिणांनान्यकामांनाकामांनान्ययोषितम्नाचप्रकुपितांनाप्रशस्तां
स्वयंचैभिर्गुणैर्य्युतः ॥ नान्ययोनावयोनौवानोपभुक्तौषधस्त ॥ क्षुत्क्षामामतिभुक्तांच
व्यवायीनाश्रमेभवेत् ॥ चैत्यचत्वरसीरेषुनैवनैवचतुष्पथे ॥ नैथा ॥ देवद्विजगुरूणांच
श्मशानोपवनेसलिलेषुम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रमत्तोपिस्त्रियमार्त्तवदर्शने ॥ स
याभ्युपगच्छतः ॥ प्रज्ञायशोब
गमनउभयनियमः ॥ ऋतौग
र्ववर्जमितिपर्वपदंनिषिद्धका
सकामत्वेनरक्षणार्थमनृता
ः ॥ स्वस्थइन्दौसकृत्पुत्रं
नुः ॥ तासामाद्याश्चतस्र
गात्रयः ॥ युग्मासुपुत्राजायंते
यात् यावत्सन्निपातंच
ह्याचम्यप्रोक्षणमंगा

हीपते ॥प्रोक्तपर्व्वस्वशेषेषुनैवभूपालसंध्ययोः॥गच्छे
प्रोक्तपर्व्वसु ॥ चतुर्दश्यष्टमीचैवअमावास्याथपूर्णिमा
तिरेवच ॥ इतिश्लोकोक्तेषु ॥ वामनपुराणे ॥ बुधेचयोषां
वर्जनीया॥ तथा॥योषिन्मघाकृत्तिकोत्तरासु ॥अत्रयाज्ञव
वसिष्ठः ॥ मलिनवाससासहनसंवसेत् नरजस्वलया ना
योग्याअप्राप्तयौवना ॥ विष्णुः ॥ नश्राद्धंदत्वा नभुक्तानाम
नदेवतायतनश्मशानशून्यालयेषु नवृक्षमूले नदिवा नसंध्ययोर्नम
रोगार्त्तानरोगार्त्तः॥नहीनाङ्गींनाधिकाङ्गींतथैवचवयोधिकां॥नोपेया
युर्जिवीविषुः ॥ वसिष्ठः॥ अपिचकाठकेप्रवचनेविज्ञायते ॥ अद्यश्वो
तिभिःसहशयीरन् इतिस्त्रीणामिंद्रदत्तोवरः ॥ समूलवचनोभोगोर्मा
लः॥ श्रीदत्तेनसतामेषआचारेदर्पणःकृतः ॥ दुरुक्तमपिसूक्तंमेमन्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपिचर्मोदकंतीर्थसलिलांतर्गतंशुचि ॥ इत्युपाध्यायश्रीदत्तकृतआचा

इदं पुस्तकं भूसिन्धुनन्दभूमिते (१९४१) वैक्रमाब्दे ऋतुविय
शालिवाहनशके श्रीकृष्णदासतनूजाभ्याम् गङ्गाविष्णु, खेमरा
" श्रीवेङ्कटेश्वराख्य " मुद्रणयन्त्रालये मुद्रितम् ॥

७४॥ गङ्गाविष्णु श्रीकृष्णदास " श्रीवेंकटेश्वर " (

याचवृद्धशाता
वमूत्रपुरीषवदि
मनमात्रम् ॥ ऋ
मनेनाप्रायत्यंज
प्रातरेवेतिवृद्धाः॥वृ
तानारीशुचिः स्या
नयोर्निवृत्तिरित्याहुः॥
चप्रकुपितांनाप्रशस्तां
॥ क्षुत्क्षामामतिभुक्तांच
या ॥ देवद्विजगुरूणांच
श्मशानोपवनेसलिलेषुम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथाचारादर्शस्थविषयाणां निर्घण्टपत्र १॥

(विषयाः)	निरंकपृष्ठं	सांकम्	पंक्तिः
अथ मूत्रपुरीषोत्सर्गविधिः ..	१	०	७
अथाचमनविधिः	५	०	९
अथाचमननिमित्तानि	०	७	९
अथ द्विराचमननिमित्तानि ..	०	८	११
अथाचमनानुकल्पविधिः ..	९	०	११
अथ दन्तधावनम्	११	०	१
अथ प्रातःस्नानादि	०	१२	८
अथ स्नानविधिः	१५	०	४
अथातो नित्यस्नानविधिः ..	०	१५	९
स्नानानुकल्पमाह	०	२१	२
अथातो नित्यस्नानम्	२२	०	२
अथ कातीयस्नानप्रयोगः ..	२४	०	४
अथ पद्मपुराणीयस्नानविधिः ..	०	२६	५
अथ संध्योपासनम्	०	२८	१
गणफलमाह	०	२९	४
उपक्रमकालमाह	०	२९	११
संध्योपक्रमे व्यासः	३१	०	७

(विषयाः)	निरंकपृष्ठं	सांकम्	पंक्तिः
गायत्रीजपे योगियाज्ञवल्क्यः ..	०	३५	१
अथ जपविधिः	०	३६	७
अथ संध्याप्रयोगः	४०	०	५
अथ ब्रह्मयज्ञः	०	४२	९
अथ तर्पणम्	४३	०	११
अथ कातीयतर्पणप्रयोगः ..	५०	०	९
अथ तर्पणोत्तरकर्म	५३	०	५
अथ देवपूजा	५५	०	६
अथ वैश्वदेवबलिकर्मणी ..	५८	०	१०
अथ प्रयोगः	०	६२	९
अथ नित्यश्राद्धम्	६४	०	५
अथ प्रयोगः	०	६४	२
अथ भिक्षादानम्	६५	०	१
अथातिथिपूजा	०	६५	११
अथ भोजनविधिः	०	०	०
अथ शयनविधिः	०	०	०
अथ दारोपगमः	०	०	०

संपूर्णम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्याचारादर्शः संपूर्णः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu